621

621

[illegible] In complete

| | | | |
|---|---|---|---|
| : | : | [illegible] Mayookha | : **Title** |
| : | : | Nelkantha Bhatta | : Author |
| : | : | | : Editor |
| : | : | | : Year, Vols. |
| : | : | | : Publisher |
| 621 : | : | Begins abruptly | : Remarks |

येपि संकीर्णकर्माणो राजानो रौद्रकर्मिणः। तेभ्यः पवित्रमाख्येयं त्वमिदं दानमनुत्तमं। किमत्र चित्रं दातारं यस्समु
द्धरते धरां प्रतिग्रहीतारमपि तारयते द्विजमित्यापि हेमाद्रौ॥ शिवधर्मे शिवाय त्वमिदं दानमुक्तं इति महीदानविधि
॥ अथ गृहदानं। कौर्मे। शक्तितः सर्वं चित्रेन पूर्णं गृहमपि त्रिधा। सदक्षिणं द्विजे दत्वा ब्रह्मलोकं व्रजेन्नरः। सर्ववि
त्तेन दासीदासगोबलीवर्दताम्रकांस्यपात्रादिसोपस्करशय्यासर्वधान्यघृतगुडशर्करादिरूपेण गारुडे। येष्ट
कं दारवं वापि सन्मयं वापि शक्तितः। सर्वोपकरणोपेतं यो दद्याद्विपुलं गृहं। ब्राह्मणाय दरिद्राय विदुषे च कुटुंबिने
॥ क्रीडित्वा सुचिरं कालं मानुषं लोकमागतः॥ भवत्यपाहृतैश्वर्यः सर्वकामसमन्वितः। ब्रह्मवैवर्त्ते नागगृहं स्यात्परोपरो
धर्मो नैव दानं गृहात्परं। नान्यस्मादधिकं पापं न पुण्यो ब्राह्मणात्परं। तथा। कारयित्वा गृहं रम्यान्नूतनं वस्त्रसंख्यया
शाल्या तद्विगुणान्येव यावत्सहस्रकं॥ उद्यत्तं भगवद्दातॄन्विचित्रान्बहुभूमिकान्। तिजगन्मोहने नारद। स्नाना
गारं दिशि प्राच्यामाग्नेयां पंचनालयं। याम्यां शायनगेहं च नैरृत्यां शस्त्रमंदिरं। प्रतीच्यां भोजनगृहं वायव्यां प
शुमंदिरं। भांडागारं चोत्तरस्यां ईशान्यां देवमंदिरं। मध्ये देवतापंचकं तत्र चत्वारिंशत्समावृतं। पूजयित्वाय

दानम०
॥२२४॥

पान्यायंततो दद्यात्स्वहं गृहही॥ एकाशीतिपदं कृत्वा रेखाभिः कनकेन वा॥ पश्चात्पिष्टेनानुलिप्तेत्सूत्रेणालोड्य सर्व
तः॥ दश पूर्वापरा रेखा दश चैवोत्तरायताः॥ सर्ववास्तुविभागेन विज्ञेया नवका नव॥ एकाशीतिपदं कृत्वा वा
स्तुवित्सर्ववास्तुषु॥ पदस्थान्पूजयेद्देवान्त्रिंशत्पंचदशैव तु॥ द्वात्रिंशद्बाह्यतः पूज्याः पूज्याश्चांतस्त्रयोदश॥ मध्ये
नवपदश्चत्वारस्त्रिपदाः स्मृताः॥ एवं प्रतिष्ठिता देवाश्चत्वारिंशच्च पंच च॥ नामतस्तान्प्रवक्ष्यामि स्थानानि च निबो
धत॥ ईशकोणादिषु सुरान्पूजयेत्क्रमशो न तु॥ ईशानाद्यौ शिखी चैव पर्जन्यो जयंतः कुलिशायुधः॥ सू
र्यः सत्यो भृशश्चैव आकाशो वायुरेव च॥ पूषा च वितथश्चैव गृहक्षत यमावुभौ॥ गंधर्वो भृंगराजश्च मृगः
पितृगणस्तथा॥ दौवारिकोऽथ सुग्रीवः पुष्पदंतो जलाधिपः॥ असुरः शोषपापौ च रोगोऽहिर्मुख्य एव च॥ भल्ला
टः सोमसर्पौ च अदितिश्च दितिस्तथा॥ बहिर्द्वात्रिंशदेते तु तदंतश्च चतुरः शृणु॥ आपश्चैवाथ सावित्रो जयो रुद्रस्त
थैव च॥ अर्यमा सविता चैव विवस्वान्विबुधाधिपः॥ मित्रोऽथ राजयक्ष्मा च तथा पृथ्वीधरः क्रमात्॥ अष्टमस्त्व
पवत्सस्तु परितो ब्रह्मणः स्मृताः॥ आपश्चैवापवत्सश्च पर्जन्योऽग्निर्दितिस्तथा॥ पदिकानां तु वर्गोऽयं एवं कू रामः
॥६६७॥

णे प्रवेशो षतः॥ तन्मध्ये तु बहिर्विंशति द्विपदास्ते तु सर्वतः॥ एतत्पूर्वं गृहारंभे कुर्याद्वास्तुविचक्षणः॥ वास्तौ परिक्षि
तौ तस्मिन्वास्तुदेहे विचक्षणः॥ वास्तुप्रशमनं कुर्यात्सम्यक्सिद्धिं बलिकर्म च॥ जीर्णोद्धारे तथोद्याने तथा च नव
वेश्मनि॥ नवप्रासादभवने प्रासादपरिवर्तने॥ द्वाराभिवर्तने तद्वत्प्रासादेषु गृहेषु च॥ वास्तुप्रशमनं कुर्यात्पू
र्वमेव विचक्षणः॥ वास्तौ परिक्षिते तस्मिन्वास्तुदेहे विचक्षणः॥ एकाशीतिपदे लिख्य वास्तुमध्ये तु पिष्टकैः॥
होमस्त्रिमेखले कार्यः कुंडे हस्तप्रमाणके॥ यवैः कृष्णतिलैश्चैव समिद्भिः क्षीरवृक्षजैः॥ पालाशैः खादिरैश्चापामार्गो
दुंबरसंभवैः॥ दूर्वादर्भैः कुशैर्वापि मधुसर्पिःसमन्वितैः॥ कार्यस्तु पंचभिर्बिल्वैर्बिल्वबीजैरथापि वा॥ होमांते भ
क्ष्यभोज्यैश्च वास्तुदेहे बलिं हरेत्॥ तद्विशेषं निवेद्य मिदं यथाक्रमेण तु॥ एवं संपूजिता देवाः शांतिं कुर्वंति ते सदा॥
सर्वेषां कांचनं दद्यादिंद्राणां गोपयस्विनीमिति॥ अथ वास्तुशांतिप्रयोगः॥ यजमानो मासपक्षाद्युल्लिख्य
वास्तोष्पतिप्रीत्यर्थं वास्तुशांतिं करिष्य इति संकल्प्य गणेशपूजा स्वस्तिवाचन मातृपूजा नांदीश्राद्धं आचार्य
ब्रह्मर्त्विग्वरणानि कुर्यात्॥ तत आचार्यो यदत्र संस्थितं अपक्रामंतु ते तामसा भूता ये त पिशाचा द्यास्त्वपक्रा

दानम: ॥११५॥

मंतुराक्षसाः। स्थानादस्माद्व्रजंत्वन्यं स्वीकरोमि भुवं त्विमामित्यातन च सर्षपान्विकीर्य पंचगव्येन सु चावोह्यो इति
ऋचेन एतो न्विंद्रं मिति च ऋचेन एतो न्विंद्रमिति च ऋचेन गृहं संप्रोक्ष्य गृहे प्राच्यां शान्त्यां वा चतुरंगुलोच्छ्रितं हस्त
मितं स्थंडिलं कृत्वा तस्येशानादिकोणचतुष्टये चतुरो लोहकीलाद विशंतु भूतले नागा लोकपालाश्च सर्वतः। अ
स्मिन् गृहे वतिष्ठंतु आयुर्बलकराः सदेति मंत्रेण निखनेत् प्रति॥ कीलमंत्रवर्त्ति। तत ईशानादिक्रमेणैव च
तुर्षु कोणेषु अग्निभ्योऽप्यप सर्पेभ्यो ये चान्ये तत्समाश्रिताः। तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तममिति मंत्रेण
माषभक्तादिबलीन्दत्वा स्थंडिलोपरि उँ शांतायै नमः। यशोवत्यै० कांतायै० विशालायै० प्राणवाहिन्यै० सत्यै०
समुत्यै० नंदायै० सुभद्रायै० सुरूपायै० इति प्रणवाद्येन मोंते दशभिर्मंत्रैः कुंकुमादिना हेमसूत्यादिशला
कया प्राक्पश्चादायताः प्रागंतता उदक्संस्था प्रागुजोंतराद्दशरेखाः कृत्वा हिरण्यायै० सुव्रतायै० विभूत्यै०
विमलायै० प्रियायै० विजयायै० बालायै० विशोकायै० इडायै इति दशनामायता उदक्संस्था दशरेखाः कुर्या
त्। एवमेकाशीतिपदं मंडलं संपद्यते। तत्र मध्यस्थनवकोष्ठानि रेखामार्जनेनैकी कुर्यात्। एतन्नवपदं ब्रह्म राम: ॥६६८॥

स्थानं तस्य चतुर्दिक्षु चत्वारि त्रिपदानि। विदिक्षु शृंखलाकाराणि द्वादशकोणचतुष्टयोन्यत् अष्टाविंश
तेकपदानि। अवशिष्टानि प्रतिदिशं पंचपंचेति विंशतिर्द्विपदानि। तेषु प्रणवाद्यश्चतुर्थ्यंतैर्नमोंतैर्वक्ष्यमाण
नामभिर्देवता आवाह्य स्थापयेत्। तत्रेशानकोणपदे वास्तोः शिरसि शिखिने नम इति शिखिनं। तद्दक्षिणैक
पदे दक्षिणनेत्रे पर्जन्यं। तद्दक्षिणे ततोऽपि पश्चिम इति द्विपदे दक्षिणश्रोत्रे जयंतं। तद्दक्षिणे द्विपदे दक्षिणे द्विप
दे दक्षिणांशे कुलिशायु। तद्दक्षिणद्विपदे दक्षिणबाहौ सूर्याय। तद्दक्षिणद्विपदे दक्षिणबाहवे वसत्याय। त
द्दक्षिणद्विपदे दक्षिणकूर्परे भृशाय० तद्दक्षिणे अंत्यपादपंक्तिगतैकपदे दक्षिणबाहौ आकाशाय० आग्नेयको
णपदे वह्नवे बल्वोयवे० तत्पश्चिमैकपदे दक्षिणमणिबंधे पूष्णे तत्पश्चिमे ततोऽपि उत्तर इति द्विपदे दक्षिणपा
र्श्वे वितथाय। तत्पश्चिमे द्विपदे दक्षिणे यमाय। तत्पश्चिमे द्विपदे दक्षिणजानौ गंधर्वाय॥ तत्पश्चिमे द्विपदे दक्षिण
जानौ भृंगराजाय। तत्पश्चिमे बाह्यपंक्तिगतैकपदे दक्षिणस्फिचि मृगाय० नैरृत्यकोणपदे पादयोः पितृभ्यः॥
तदुत्तरैकपदे वामस्फिचि दौवारिकाय० तदुत्तरे ततोऽपि प्राचि इति द्विपदे वामजंघायां सुग्रीवाय तदुत्तरे द्वि

पदेवामजानौपुष्पदंताय॥ तदुत्तरे द्विपदे वामोरौ जलाधिपाय॥ तदुत्तरे द्विपदे वामपार्श्वे एव शोषाय॥ तदुत्तरे बा
ह्यपंक्तिगतैकपदे वाममणिबंधे पापाय वायव्यकोणपदे वामप्रकोष्ठे रोगाय तस्याप्येकपदे वामपार्श्वे एव अह
ये तस्यापि ततो दक्षिणे चेति द्विपदे वामकूर्परे मुख्याय॥ तस्यापि द्विपदे वामप्रबाहौ भल्लाटाय तस्यापि द्विपदे
वामबाहौ वेव सोमाय॥ तस्यापि द्विपदे वामांसे सर्पाय॥ तस्यापि द्विपदे वामश्रोत्रे अदितये॥ तस्यापि बाह्य
पंक्तिगतैकपदे वामनेत्रे दितये॥ तद्दक्षिणे ईशानकोणपदाधः॥ पदेषु सुरवेश्मपायनमः॥ आग्नेयकोणपदाः
कोणपदे दक्षिणहस्ते सावित्राय॥ नैर्ऋत्यकोणपदाधः॥ कोणपदे मेढ्रे जयाय॥ वायव्यकोणपदाधः॥ कोणपदे
वामहस्ते रुद्राय॥ मध्यमन्वकोष्ठक ब्रह्मपदसंलग्नेषु प्रागाते त्रिपदे दक्षिणनागे विवस्वते॥ तत्पश्चिमैकपदे वृष
णयोर्विबुधाधिपाय॥ तदुत्तरे ब्रह्मपदसंलग्नत्रिपदे जठरवामनागे मित्राय॥ तदुत्तरैकपदे वामहस्ते राजयक्ष्मणे
॥ तत्प्राचि त्रिपदे वामस्तने पृथ्वीधराय॥ तस्याग्रैकपदे उरसि आपवत्साय॥ मध्यमे नवपदे हृन्नाभ्योर्ब्रह्म
णे तदुत्तरे वास्तोष्पते प्रतिजानाति वृषवास्तुसुवर्णादिप्रतिमायां मंडले वा ब्रह्महिरीशानादिकोणेषु चरकी विदारी॥२



पूतनां॥ अपापराक्षसीं॥४ पूर्वादिषु स्कंदं॥१॥ अर्यमणं॥२ जृंभकं॥३ पिलिपिच्छं॥४ प्राच्याद्यष्टदिक्षु इंद्रादीनावाह्य सं
पूज्य मंडलादीशान्यां कलशं संस्थाप्य तत्र वरुणं संपूज्य कुंडे स्थंडिले वाग्निं संस्थाप्य तदीशान्यां ग्रहवेदीं ग्रहा
नावाह्य संपूज्य तदीशान्यां कलशं संस्थाप्य तत्र वरुणं संपूज्यान्वाधाने चक्षुषी आज्येनेत्यंतमुक्त्वा ग्रहानामुकसंख्याया
समिद्वाज्यैः॥ शिखिः पर्जन्यः जयंतः कुलिशायुधः॰ सूर्यः सत्यः भृशः आकाशः वायुः पूषा॰ वितथाय गृहक्षत यम
ःगंधर्वः भृंगराज॰ मृग॰ पितृ॰ दौवारि॰ सुग्रीव॰ पुष्पदंत॰ जलाधिपासुर॥ शोष पापरोगा अहिमुख्य भल्लाट सोम
सर्प अदिति दितीः आपवत्सा चित्र॰ जयरुद्र आपसवित्रा किंटविवस्व द्विबुधाधिप॰ मित्र राजयक्ष्म पृथ्वीधरायवत्स ब्रह्मणः
यव तिलसमिदाज्यपायसै रमुकसंख्यया वास्तोष्पतिमेतैरेव द्रव्यैरमुकसंख्यया पंच पिष्टैत ब्रीजैर्वा पद इत्युक्ता
शेषेण त्यादि आज्यभागांते ग्रहहोमं कृत्वा यव तिलसमिदाज्यपायसैः॥ शिख्यादिदेवताभ्यो नाममंत्रैः प्रत्येकमष्टा
दशाविंशतिमष्टोत्तरशतं वा कृत्वा वास्तोष्पतये एतान्येव द्रव्याणि अष्टोत्तरशतं जुहुयुः ऋत्विजः॥ तत्र वास्तोष्पते इ
ति चत्वारो मंत्राः॥ एकैकेन वा चमंत्रेण सप्तविंशति आहुतय इति अष्टोत्तरशतं तत एते मंत्रैः चतुर्भिर्वास्तोष्पते प्र

दानम०

॥२२१॥

वास्तुरूपाणि मिति चषं च विंशतिं पंच वा बिल्वफलानि तद्दीजानि जुहुयुः तत्राचार्यः स्विष्टकृदादिहोमशेषं समापयेत् यज
मानलोकपालेभ्यो यहरूपी वदेवताभ्यो बलिं दत्वा ष्टकृतिं कृत्वा शिखादिपं च चत्वारिंशद्देवताभ्यः पायसादिना
बलिं दत्वा ईशानादिक्रमेण चरकी विदारी पूतना पराक्षसीभ्यश्च बलिं दत्वा शिष्यादि प्रातर्येकां च नं द्विजेभ्यः ब्रह्म
प्रातयेधेनुं च दद्यात् ततः शांतिकलशोदकेन कृत्विग्भिरभिषिक्तो यजमानः ऋत्विग्भ्यो दक्षिणां दत्वा वाद्यादिपूर्वकं करा
ग्रोद्यपावमानमंत्रैर्गृहं सूत्रेण प्रदक्षिणं वेष्टयित्वा समंतात् जलधारां च दत्वा मध्ये नवपदे सरूपां ष्टथ्वीं ध्याला
ष्टष्वैनम इति संपूज्य सर्वदेवमयं वास्तुं सर्वदेवमयं परमिति । पवित्वा गृहस्याग्नेये भ्याकाग्रपदे जानुमात्रं गर्त्तं खा
त्वा गोमयेनालिप्य सुभ्रं चंदनपुष्पाक्षतैरलंकृत्य बीजानि दध्योदनं च क्षिप्त्वा नवं जलं पूर्णं कलशं शुक्लैकपुष्पयु
तं गंधाद्यर्चितं मा हायजानुभ्यां भुवं गत्वा जलं गर्त्ते क्षिपेत् ॐ नमो वरुणायेति मंत्रेण जलं प्रदक्षिणावर्त्तेषु सु
ष्येवोर्द्धमुखेषु नंततो पद्मकमत्स्ये ष्टिकायोम न बीजं दध्योदनं शैवालफलपुष्पाणि क्षिप्त्वा सत्वर्यघोषं पूर्वस्था
पितां दषवास्तुप्रतिमामानीययेष्टिकांपांसं स्थाप्य येष्टिकां पिधापयेवेत् । पूजितो विमणा वास्तो होमाद्यैरर्चनैः ॥

राम:

॥६७॥

ह्युते । पमादपाहि विघ्नेशादेहि मे गृहजं सुखं । वास्तुपुरुष नमस्तेस्तु मच्छाप्पा निरत । प्रभो । मद्दृहं धनधान्यादि
समृद्धं कुरु सर्वदेतिततो मत्स्यो ष्टिगर्ते संस्थाप्य सशैलसागरां ष्टथ्वीं यं यावद्दहसि मूर्द्धनि तथा मा वहकल्याण
संपत्संततिमिः सहेति संप्रार्थ्य तयेव मृदा गर्त्तं पूरयेत् मृदन्त्राधिकोधिकफलं । साम्ये समं न्यूनत्वे न्यूनं गर्त्ते तौ
परिगोमयेतालिप्य गंधपुष्पाक्षतादिक्षिप्त्वाचार्यं ब्रह्मत्विंजः संपूज्य तेभ्यो दक्षिणां च दत्वाग्नरूपाव वास्तुपी
वदेवताः संपूज्य उत्तिष्ठ ब्रह्मणस्पते यांतु देवगणा इति विसृज्याचार्याय दत्वा ब्रह्मशिरव्युद्दे श्रेन शक्त्या विप्रा ।
न्संभोज्य भूयसीं दक्षिणां दत्वा सुहृद्युतो भुंजीत । इति गृहवास्तुशांतिप्रयोगः । अथ गृहदानप्रयोगः । गृहमध्ये
दाग्दक्षिणभागे यमं विलिख्य तदुपरि प्रस्थमात्रान् तिलान् तदुपरि शय्यां स्थापयित्वा शय्योपरि सौवर्णं लक्ष्मीना
रायणप्रतिमां संपूज्य प्रतिग्रहीतारं सपत्नीकं प्रति यथार्घं दत्वा तत्करे गृह्य त्वा समंगलघोषं वक्ष्यमाणमंत्रेण गृ
हं प्रवेशयेत् । ते च मंत्राः । एत्तोहिनारायणादिव्यरूप सर्वामरैर्वंदितपादपद्म शुभाशुभानं दशुचामधीशस्त्र ।
दम्मायुतस्त्वं च गृहं गृहाण । नमः वौ क्षमनायापंहिरण्यकं च चोपचः श्री रोदार्णवरवाणेकारत्नवदेहे स्ववास्त

दानम.
॥११६॥

ता:॥ नंदं तिपावत्कल्पांतं तथास्मिन्भवने गृहात्वत्प्रसादेन देवेश पुत्रपौत्रैर्युतो गृहे॥ पंचयज्ञक्रियायुक्तो वसेदाचंद्र
तारकं॥ ततस्तं पूर्वस्थापितशय्योपरि सुखमुपवेश्य स्वयमासेने प्राङ्मुखउपविश्य देशकालकीर्तनो
त्तरममुकगोत्रायामुकशर्मणे ब्राह्मणायेदं गृहं यथेष्टकादिरचितं यथोपयन्त्रितं संपादितं कांस्यताम्रादि
भाजनसर्वधान्यलवणघृतगुडशर्करागोबलीवर्द दासीदासमंचतूलिकावितानादिसर्वोपकरणायु
तं सदीपमनोपेतं सर्वदैवतं सर्वपापक्षयपूर्वककल्पकोटिशतावधिब्रह्मलोकमहीयमानत्वका
मः त्वमहं संप्रददे इति दद्यात्॥ शिलापक्केष्टकाकाष्ठारचितगृहेतु कल्पकोटिशतावधिनारायणसमी
पे क्षीरार्णवनिवासकाम इति॥ मृन्मयगृहे दानेपि एकैकमन्वंतरावछिन्नतत्तल्लोकपालपुरनिवासकामइ
ति॥ यथासर्वत्र विष्णुप्रीतिकामः ततः प्रार्थना॥ इदं गृहं गृहाण त्वं सर्वोपस्करसंयुतं तव विप्र प्रसादेन ममा
स्त्वति नवं गृहं॥ गृहं मम विचित्रं सर्वं गृहाण त्वं द्विजोत्तम॥ प्रीयतां मे जगद्योनिर्वास्तुरूपी जनार्दन इति राम:
ततः प्रतिगृहीता देवस्यत्वेतपुरुष्या प्रतिगृह्णातु मे स्वस्ती॥ तुष्टकामस्त्व॥ ति पव्यं मे जगद्योनिर्वास्तुरूपी॥ ॥६१२

जनार्दन इति॥ ततः प्रतिगृहीता देवस्य त्वेतिपवेत्॥ दक्षिणां तु सुवर्णं सहस्रमारभ्यैकसुवर्णपर्यंतं शक्त्या दद्यात्॥ ग्रहीता
तत मातृकोपानह छत्रचामरादिकं पुनर्दत्वा॥ संपन्नं वाप्य संपन्नं गृहोपस्करभूषणं॥ सर्वं संपूर्णमेवास्तु
त्वत्प्रसादाद्द्विजोत्तमेति प्रार्थयेत्॥ एतत्फलमपि मात्स्ये पराशरे सर्वसंपन्नं पक्केष्टं विनिवेदयेत्॥ कल्पकोटिश
तं यावद्ब्रह्मलोके महीयते॥ शैलजं दारुजं वापि पिप्पादद्याद्विधिपूर्वकं॥ वसेत्क्षीरार्णवे रम्ये नारायणसमीपतः॥
मृन्मयं वापि यो दद्याद्गृहं चोपस्करान्वितं॥ पुरेषु लोकपालानां प्रतिमन्वंतरं वसेदिति॥ एतद्वास्तुपूजनमनेन
विधिना यस्तु प्रतिसंवत्सरं बुधः॥ गृहे चायतने कुर्यान्न स दुःखमवाप्नुयादित्युक्तत्वात्प्रतिसंवत्सरं कर्तव्य
म्यत्र वास्तुदेवतानां विशेषनैवेद्यानि शिखिने घृतौदनं॥ पर्जन्याय सोत्पलं घृतोदनं॥ जयंताय पीतध्वजं पिष्ट
मयं कर्वंच कुलिशायुधायपंचरत्नानि॥ पौष्टं कुलिशंच सूर्याय वितानकं धूम्रं सक्तुं चा सत्याय घृतगोधूमान्न
शायमत्स्यान्नं॥ अंतरिक्षाय शष्कुली॥ वायवे सक्तून्॥ पूष्णे लाजा॥ वितथाय चणकौदनं॥ गृहक्षताय मन्नं॥ य
माय पिशितोदनं॥ गंधर्वाय गंधोदनं॥ भृंगराजाय मेषजिह्विकां॥ मृगाय पयावकं॥ पितृभ्यः कृसरं॥ दौवारिका

दानम॰ प्रदंतकाष्ठे ये ष्टं ब्रह्म पञ्चिंच । सुधीवाया ऽ पुष्पं दंताय याय स्तावरुणाय कुशा क्तं वसा दत्ता । पद्मं अप्सुराय येजं
॥१२८॥ हिरण्मयं सुराच । शेषिय घृतोदनं । पापाय गोधां रोगाय घृतलड्डुकान् नक्षत्रेभ्यो हयेनाञ्चितं पुष्पं सुरव्यापुस
र्पिः । ध्वाटाय मुञ्जौदनं सोमाय मधुपायसं । सर्पेभ्यः शालिपिष्टं अद्वितये योलिका । दितये पूरिकां । आया
शीरमाषवत्सापक्षधि । सावित्राय लड्डुकाकान् लक्ष्मरोचं कुशोदकं । सवित्रे गुडौ पूयं जयाय घृतचंदन
विवस्वते रक्तचंदनं । नपापु संराजयक्ष्मणे आमपक्वं च मांसं इंद्राय हरितालोदनं घृतसंयुतं । गुडौदनं तु
मित्राय रुद्राय घृतपायसं । पृथ्वीधरामो सानिकुष्मांडानि चन्द्रार्यमणोन्ना कराया यसं । पंचगव्यं
यवांश्चैव तिलाक्षतं हविष्यं रुन्न । नक्तं नेजपविविधवस्त्रे विनिवेदयेत् दितिराज्ञ सीनां तु इंशान नागं चवत्से
मांसौदनं घृतं पद्मकेसरं हविषान्वितं । आर्येपे विदायैसरुधिरमांसौदनं हरिसौदनं चुनिकं तैपूतनायेस
रुधिरं दध्यौदनं मात्स्यरवंडैश्च संयुतं । पाजरकं व बलिं । वापव्ये पापराक्षसेभ्यो मत्स्यमांसं सुरासवं । सर्वत्रपा
यसे धाद्देधात् इति ग्रहदानप्रयोगः । कृत्वा मंत्रप्रयत्नेन शायमासं युतं । पुण्यकाले द्विजेभ्यो यप्रतिभ्यो रामः ॥६७२॥

यपतिभ्यो वा निवेदयेत् । सर्वान्कामानवाप्नोति निष्कमोक्षमाप्नुयादिति स्कांदोक्तं मवदानं कार्यं । मार्कंडेय । उ
र्यात्प्रतिश्रयं गृहं पथिकानां हितावहं । निजगेहैकदेशं वा सम्भूतानां यो निवेदयेत् । अन्नं यं पुण्यमुद्दिष्टं तस्याख्य
गायवर्गदां सर्वकामसमृद्धो सौ देववद्दिविमोदते । नविष्णुपुराणेपि । प्रतिश्रयेषु विस्तीर्णे कारितैस जलेधने
दीनानाथजनार्थाय यद्दक्तिं नक्तं भवेत् । प्रतिश्रये धर्मशाला । इति प्रतिश्रयदानं । वृहस्पतिः । सहस्रमेव धेनू
नां वा तं वानडुहां समं दद्यानडुत्समं यानं दत्ता यानसमो हयः । दशवाजिसमा कन्या भूमिदानं च तत्समं । तस्मा
त्सर्वेषु दानेषु दानेषु कन्यादानं वशिष्यते । वह्निपुराणे । कृत्वा कन्याप्रदानं च । पितरश्च पितामहाः । विमुक्ताः
सर्वपापेभ्यो ब्रह्मलोके व्रजंतित इति । देवलः । तिस्रः कन्याप्रथान्यायं पालपित्वा निवचा । न पितान रकं या
ति नारी वा सा प्रसूयिनी वसिष्ठः । त्वा रकद्विति गौरीणां सप्तजन्मानुगं फलं धर्मेण विधिना दातुमसगोत्रो पि
युज्यते स्कांदे । आत्मीकृत्यसुवर्णेन परकीयां तु कन्यकां कृष्णश्रृंगा वरगोत्रसमुद्वार्यप्रपितामहपूर्वकां नाम
कीर्तये द्विद्वान् कन्यायाश्चैवमेवाह । तिष्टस्सर्वसुरवो दाता वरः प्रत्यङ्मुखो भवेत् । मधुपर्कार्चितायैनां त

दानम०

॥१२०॥ स्मै दद्यात्सदक्षिणां ॥ उदपात्रं ततो गृह्य मन्त्रेणानेन दापयेत् ॥ गौरी कन्यामिमां विप्र यथाशक्ति विभूषितां ॥ गो
त्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥ भूमिं गवाश्वदासीश्च वासांसि च स्वशक्तितः ॥ महिष्यो वाजिनस्तद्वद् दद्या
त्स्वर्णयुतानपि ॥ ततः स्वगृह्यविधिना होमाद्यं कर्म कारयेत् ॥ यथाचारं विधेयानि मंगलान्युक्तानि च ॥ कन्या
दाता प्राङ्मुखो वा वरः प्रत्यङ्मुखः ॥ दाता उदङ्मुखो वर प्राङ्मुखः इति निद्दचरणाः ॥ आचारश्चात्र त्रायं योगः ॥ वरं
मधुपर्केण संपूज्य मासपक्षाद्युक्त्वा मम समस्तपितॄणां निरतिशयसानंदब्रह्मलोकावाप्त्यादि कन्यादान
कल्पोक्तफलावाप्तये ऽनेन वरेणास्यां कन्यायामुत्पत्स्यमानसंतत्या द्वादशावरान् द्वादशपरान्पुरुषान्पवि
त्रीकर्तुमात्मनश्च श्रीलक्ष्मीनारायणप्रीतये ब्राह्मविवाहविधिना कन्यादानमहं करिष्ये इति संकल्प्य कन्यां
कनकसंपन्नां कनकाभरणैर्युतां दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥ दद्यात् ॥ वरः स्वस्ति देवस्त्वे
ति प्रतिगृह्य स्वस्त्यस्तु स्वस्त्यस्त्वाखारवायां कामस्क्तिपठेत् ॥ एवं ममेत्यादिना संप्रददे इत्यंते वाक्येन निर्दद्या राम:
त् ॥ कन्यादानप्रतिष्ठार्थममुं वरं दक्षिणां भूमिदास्यादिकं यथाशक्ति दद्यात् ॥ अंबनरः सर्वच्छ्ऽताः साक्षि ॥६७३॥

णः ॥ सर्वदेवता ॥ इमां कन्यां प्रदास्यामि पितॄणां तारणाय च ॥ इति मंत्रं पुनर्ममेत्यादि प्रातर्यइत्यंतमुक्त्वा अमुकप्रवराया
मुकगोत्रायामुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः पुत्रायामुकशर्मणे वराय श्रीधररूपि
णे अमुकप्रवरामुकगोत्रोत्पन्नाममुकशर्मणः प्रपौत्रीममुकशर्मणः पौत्रीममुकशर्मणः पुत्रीममुकनाम्नीं श्रिय
कन्यामारूपिणीं तुभ्यमहं संप्रददे इति वरहस्ते ॥ विस्तरस्तु प्रयोगरत्ने भट्टचरणोक्तः ॥ इति कन्यादानं ॥ स्कांदे वै
वाहिकप्रदानं ह्रियो ददाति दयापरः ॥ विमानेनार्कवर्णेन किंकिणीजालमालिना ॥ स देहमवनं याति सेव्यमानोऽप्स
रोगणैरिति ॥ वैवाहिकं विवाहयोग्यं वस्त्रालंकारादीति वैवाहिकदानं ॥ अथ कपिलादानं ॥ आदित्यपुराणे ॥ स
हस्रं यो गवां दद्यात्कपिलां चापि सुव्रता ॥ सममेव पुरा प्राह ब्रह्मा ब्रह्मविदां वरः ॥ रुक्मशृंगीं रौप्यखुरां सवत्सां कां
स्यदोहिनीं ॥ सवत्सां कपिलां दत्वा वंशानस्त प्रसमुद्धरेत् ॥ यावंति चास्या रोमाणि सवत्साया भवंति हि ॥ सुर
लोके महासाद्य रमते तावतीः समाः ॥ अथेतादिगोसहस्रफलावाप्त्यनंतरवत्सकपिलारोमसमितवर्षप
र्यंतं कामधेनुलोकनिवासकाम इमां कपिलां रुद्रदेवत्यां घंटाद्युपस्कारयुताममुकप्रवरायामुकगोत्राय

मसुकशर्मणे विप्राय तुभ्यमहं संप्रददे न ममेति दद्यात्। मंत्रो मात्स्ये कपिले सर्वभूतानां पूजनीयासि रोहि
णी तीर्थदेवमयी यस्मादतः शांतिं प्रयच्छ मे तत्रैव वस्त्रतुल्यगुणं धेनुदक्षिणां च चतुर्गुणं एतैरलंकृतां धे
नुं घंटाभरणभूषितां कपिलां विप्रमुख्याय दत्वा मोक्षमवाप्नुयात्। मुमुक्षुर्वस्त्रत्रयोपेतां दत्वा चतुरः सुव
र्णान् दक्षिणां दद्यादित्यर्थः। द्विगुणोपस्करोपेतामदत्वा कपिलां स्वतां उपस्करा सुवर्णशृंगवस्त्रदोहनपा-
त्राद्याः सामान्यगोदाने वक्ष्यमाणा दत्वा साविप्रमुख्याय स्वर्गमोक्षफलप्रदा सप्तजन्मकृतात्पापान्मुच्यते दशसं
युता यान्यान् प्रार्थयते कामान् प्राप्नोति मानवः। अघेत्यादि सप्तजन्मकृतपापनाशपूर्वकं स्वर्गकामो मोक्ष
कामः पुत्रकामः श्रुतकाम ईश्वरप्रतिकाम इत्यादि यथाकामं फलमुद्दिश्य द्विगुणोपस्करोपेतां दद्यादि
ति महाकपिलादानं इति दशमहादानानि। दशधेनवो मात्स्ये। यास्तु पापविनाशिन्यः कथिता दशधेनवः। ता
सां स्वरूपं वक्ष्यामि नामानि च नराधिप। प्रथमा गुडधेनुः स्याद् घृतधेनुस्तथापरा। तिलधेनुस्तृतीया तु चतुर्थी
जलसंज्ञिता। क्षीरधेनुस्तु विख्याता मधुधेनुस्तथापरा। सप्तमी शर्कराधेनुर्दधिधेनुस्तथाष्टमी। रसधेनुस्तु



नवमी दशमी स्यात्स्वरूपतः। कुंभघृतादिधेनूनां इतरासां तु राशयः। सुवर्णधेनुमप्यत्र केचिदिच्छंति मानवाः।
नवमीं तिलतैलेन तथान्येपि महर्षयः। रसधेनुस्थाने सुवर्णधेनुस्तिलधेनुश्च। एतद्विधानमपि मात्स्य एव कृ-
ष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि। गोमयेनोपलिप्तायां दर्भानास्तीर्य सर्वतः। लघ्वैणकाजिनं तद्वद्वत्सस्य प
रिकल्पयेत्। लघ्वैणकाजिनं लघुकृष्णाजिनं। प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकां। प्राङ्मुखीं प्राविशारसं
सवत्सां उत्तरभागस्थितवत्ससहितां। उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयं। वत्सं भारेण कुर्वीत भाराभ्यां
मध्यमा स्मृता। अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु। चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः। भारः पल
सहस्रद्वयमिति परिभाषायामुक्तं। धेनुवत्सौ घृतस्यैतौ सितसूक्ष्माम्बरावृतौ। शुक्तिकर्णाविक्षुपादौ शुचिमु
क्ताफलेक्षणौ। सितसूत्रशिरालौ तौ सितकंबलकंबलौ। ताम्रगडुकपृष्ठौ तौ सितचामररोमकौ। गडुकं ककु
त्प्रदेशे विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ। क्षौमपुच्छौ कांस्यदोहौ इंद्रनीलकतारकौ। सुवर्णशृंगाभर
णौ राजतक्षुरसंयुतौ। नानाफलमयैर्दंतैर्घ्राणगंधकरंडकौ। गंधकरंडकः कर्पूरादिपूरितः। पात्रविशेष

॥ इत्येवं स्वचिंत्वात् धूपदीपैरथार्चयेत् वस्त्रमुक्तादीनां सारतो मनतश्चाधिक्ये फलाधिक्यं अथ प्रयोगः॥ अ
द्येत्यादि सर्वपापक्षयपूर्वकाशेषयज्ञफलप्राप्तिसहितभुक्तिकामो गुडधेन्वादिदानं करिष्य इति संकल्प्य वि
प्रं वृत्वा संपूज्य सवत्सगुडधेनवे नमः इत्यावाहनप्रतिष्ठापनपूजनानि कृत्वा तां प्रदक्षिणी कृत्य वक्ष्यमाणमंत्रैरावा
ह्येत्यादि सर्वपापक्षयपूर्वकाशेषयज्ञफलप्राप्तिसहितभुक्तिकाम इमां धेनुममुकप्रवरायामुकगोत्रायामु
मुकशर्मणे विप्राय तुभ्यमहं संप्रददे न ममेति दद्यात् विप्रस्तु पुच्छे प्रतिगृह्य स्वस्तीत्युक्त्वा कामस्तुतिं पठे
त् दाता सुवर्णदक्षिणां दानविप्रभोजनं भूयसीं दानादिकमशेषं समापयेत् अथामंत्रणमंत्राः॥ या लक्ष्मीः
सर्वभूतानां या च देवेष्ववस्थिता॥ धेनुरूपेण सा देवी मम शांतिं प्रयच्छति॥ देहस्था या च रुद्राणी शंकरस्य सदा
प्रिया धेनुरूपेण सा देवी मम पापं व्यपोहतु॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः चंद्रार्कशक्रशक्तिर्या
धेनुरूपास्तु सा श्रिये चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च लक्ष्मीर्या लोकपालानां सा धेनुर्वरदास्तु मे रामः
स्वधा त्वं पितृमुख्यानां स्वाहा यज्ञभुजां तथा सर्वपापहरा धेनुस्तस्माच्छांतिं प्रयच्छ मे इति एवमामंत्र्य तां ॥ ६५

धेनुं ब्राह्मणाय निवेदयेत् विधानमेतद्धेनूनां सर्वासामिह मन्यते सर्वासां प्रत्यक्षधेनुव्यतिरिक्तानामित्य
र्थः। उक्तश्च तस्मात्तत्रानुपयोगात् एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः। मंत्रावाहनसंयुक्ता सदा पर्वणि प
र्वणि यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदा अशेषयज्ञफलदाः सर्वपापहराः शुभाः॥ अयने विषुवे
पुण्ये व्यतीपाते तथा पुनः गुडधेन्वादयो देयाः उपरागादिपर्वसु॥ अत्र पापविनाशिन्य इत्युपक्रमात्सर्व
पापहरा इत्युपसंहारात्सर्वपापहरा इत्युपसंहाराच्च पापनाशनमेव फलं न भुक्तिमुक्तिरिति दानसौख्ये॥ तन्न पुनरेषावि
वार्थवादानां भुक्त्यादीनां त्यागे मानाभावात् उपक्रमोपसंहारौ तु प्रयोजकौ॥ यत्तु पद्मपुराणे दशवैकेनेव वृद्ध
तादिधेनुः। द्रोणमात्रेण च तिलधेनुरुक्ता। तत्प्रकारांतरमिति कल्पतरौ। दानविवेके तु पलस्य हस्तस्य प्रमाणं कुंभ
इति द्वादशपलाधिकानि पंचपलशतानि कुंभ इत्यन्ये॥ तत्र च यथाधिकारं व्यवस्था ज्ञेया यथा घृतपिंडधेन्व
नंतरं घृतधेनुरुद्दिष्टा तथापि तिला नावेद्या त्। घृतधेनुमुक्त्वा तिलानां धान्यानां धेनुमुक्त्वा। रसाद्युच्यते तत्र।
किंचित्प्रकारांतरं विष्णुधर्मोत्तरे। अलिप्ते महीपृष्ठे वस्त्राजिनकुशान्विते। धेनुं तिलमयीं कृत्वा सर्वरत्नैरलंकृतां धेनुं।

दानम० रोदेन कुर्वीत तन्माठकेन तु वत्सकं ॥ स्वर्णशृङ्गीं रौप्यखुरां गंधघ्राणवतीं तथा ॥ कुर्याच्छर्कराकराजिह्वां गुडास्यामवि
॥१२३॥ कंबलां ॥ इक्षुपादां ताम्रपृष्ठां ॥ विमुक्ताफलनेत्रां ॥ प्रशस्तपत्रश्रवणां फलदंतमयीं शुभां ॥ स्रग्दामपुच्छां कु
र्वीत नवनीतस्तनान्वितां ॥ सिततन्त्रशिरालां च सितसर्षपरोमिकां ॥ फले मनोहरे नद्यै मणिमुक्ताफलान्वि
तां ॥ सितवस्त्रयुगच्छन्नां घंटाभरणभूषणां ॥ ईदृक्कृसंस्थानसंपन्नां कृत्वाश्रद्धासमन्वितः ॥ कांस्योपदोहनां दद्या
त्केशवः प्रीयतामिति ॥ फलेतिकर्तव्यतामंत्रा गुडधेनुवत्काः गवबह्निपुराणे तु ॥ तिलाश्च पिष्टदेवं त्या निर्मिताः धे
हनो सवे ॥ ब्रह्मणा तन्मयी धेनुर्दत्ता प्रीणातु केशवमिति ॥ मंत्रांतरमुक्तं ॥ अथ घृतधेनुः ॥ विष्णुधर्मोत्तरे ॥ तिला
नावेतथा दद्याद्घृतधेनुं प्रयत्नतः ॥ वासुदेवं जगन्नाथं घृतक्षीराभिषेचनात् ॥ संपूज्य पूर्ववत्सुपुष्पैर्गंधधूपादि
भिर्नरः ॥ अहोरात्रोषितो नाम्ना अपि स्थघृतार्चिषं ॥ अग्निषु पप्रज्वाल्य घृताविषमर्घ्ये ॥ गव्यस्य सर्पिषः कुंभं
पुष्पमालादिभूषितं ॥ कांस्यापिधानसंयुक्तं सितवस्त्रयुगेन वाहितं मणिविद्रुममौक्तिकैः ॥ अन्नपलसह
स्रपरिमाणः कुंभः द्वादशफलाधिकानि पंचपलशतानीति च ॥ इक्षुयष्टिमयान्पादान्खुरान् रौप्यमयां रामः ॥६७६॥

स्तथा सौवर्णे चाक्षिणी कुर्याच्छृंगे च गुरुकाष्ठजे ॥ सप्तधान्यमये पार्श्वे पत्रोर्णेन वर्कं बलं ॥ कुर्यात्तु रुष्ककर्पू
रैर्घ्राणं फलमयांस्तनान् ॥ तद्वच्छर्करया जिह्वां गुडक्षीरमयं मुखं ॥ पत्रोर्णधौतकौशेयं तु रुद्धः सिन्दूरकं
सिक्कारस इति यावत् ॥ पुच्छं कृत्वा मम यं कायं रोमाणि सितसर्षपैः ॥ ताम्रपृष्ठं विचित्रं तु ईदृग्रूपा मनोहरा
विधिना कृतवत्सां च कुर्यात्सलक्षणलक्षितां ॥ एतै ॥ कृत्वा तथा नत्वा पूजयित्वा विधानतः ॥ तद्भक्ताय प्रदातव्या
मंगलाशास्त्रपारगे ॥ एतां मनोपकाराय गृह्णीष्व त्वं द्विजोत्तम ॥ प्रीयतां मम देवेशो घृतार्चिः पुरुषोत्तमः ॥ इ
त्युदाहृत्य विप्राय दद्याद्धेनुं नराधिप ॥ स्कांदे त्वयं मंत्रः ॥ घृतं गावः प्रसूयंते घृतं चास्या प्रतिष्ठितं ॥ घृतमयि
श्व देवाश्च घृतं मे संप्रदीयतामिति ॥ फलं च ॥ घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः ॥ तेषु लोकेषु सर्वेषु पुण्येषु प
जायते ॥ सकामानामियं युष्टिः कथिता नृपसत्तम ॥ युष्टिफलं विष्णुलोकं नरा यांति निकामा धेनुदानत इत्यादि
दक्षिणा त्वेकसुवर्णा प्रन्नति यथाशक्तीति मदनरत्ने यथाशक्ति हिरण्यमिति हेमाद्रौ ॥ अथ जलधेनुः तत्रैव
जलधेनुं प्रकल्प्या जलकुंभं नरव्याघ्र सुवर्णरजतशृंगखुरान्वितमिति सांप्रदायिका रत्नगर्भमशेषैस्तु याम्ये द्वी

दानम० १२४

भैः समन्वितं सितवस्त्रयुगछन्नं दूर्वापल्लवशोभितं कुष्टमांसीमुरोशीरकालकामलकैर्युतं। प्रियंगुपत्रसहितं
सितवस्त्रोपवीतिनं सछत्रं सउपानत्कं दर्भविष्टरसंस्थितं चतुर्भिसंवृतं नृपतिलपात्रैश्चतुर्दिशं। स्थितं
दणिधिमात्रेण घृतक्षौद्रवतामुखे तिलपात्राणि ताम्रस्य दधिपात्रं कांस्यस्येति दानविवेके उपोषितसमभ्यर्च्य
वासुदेवं जलेशयं पुष्पधूपोपहारैश्च यथाविभवमाहृतः संकल्प्य जलधेनुं च कुंभं तमभिपूज्य च। पूजयेद्वत्स
कं तद्वत्तं जलमयं बुध। एवं संपूज्य गोविंदं जलधेनुं सवत्सकां सितवस्त्रधरः शांतो विरागो विमत्सरः। दद्या
द्विजाय राजेंद्र प्रात्यर्थं जलशायिनः। जलशायी जगद्योनिः प्रियतां मम केशव। इति वोच्चार्य नृतानां विप्रा
तिय प्रतिपाद्यतां अपक्वान्नाशिनास्थेयम होरात्रमतः परं। तथा धान्यानि पार्श्वद्वये कुष्टादीनि घ्राणे देशे।
प्रियंगुपत्रश्रवणे यज्ञोपवीतं मध्ये स्थापयेत्। वत्सं चतुर्थांशेनैव। दक्षिणाद्यक्तितः सुवर्णं अनेन विधिना राम:
दत्वा जलधेनुं नराधिप। सर्वान्कामानवाप्नोति येदिव्यायेच मानुषा इति। अथ क्षीरधेनु। स्कांदे। क्षीर ॥६११॥
धेनुः प्रवक्ष्यामि तां निबोध नराधिप। अनुलिप्ते महीपृष्ठे गोमयेन नराधिप। गोचर्ममात्रमानेन कु-

शानां स्तीर्य सर्वतः। तत्रोपरि महाराज न्यसेत्कृष्णाजिनं ततः। तत्रे परिकुंडिकां गोमयेन कृतामपि। क्षी
रकुंभं ततस्तत्राप्यचतुर्थांशेन वत्सकं। सुवर्णमुखश्रृंगाणि चंदनागरुकाणि च। प्रशस्तपत्रश्रवणं तिलपात्रोप
रिन्यसेत्। मुखं गुडमयं तस्याजिह्वा शर्करया तथा। मूलप्रशस्तदंतांच मुक्तामयफलेक्षणं। इक्षुपादांद
रोमां सितकंबलकंबला। तम्रपृष्ठां कांस्यदोहां पट्टसूत्रमयी तथा। पुच्छं चन्द्रप्रशाद्य नवनीतमयस्तनी
स्वर्णशृंगारौप्यखुरां पंचरत्नमयं नु च। चत्वारि तिलपात्राणि चतुर्दिक्षु प्रस्थापयेत्। सप्तव्रीहिसमायुक्तो दि
क्षु सर्वासु प्रक्षिपेत्। एवं लक्षणसंयुक्तां क्षीरधेनुं प्रकल्पयेत्। आछाद्य वस्त्रयुग्मेन गंधपुष्पैः समर्चयेत्।
धूपदीपादिकं कृत्वा ब्राह्मणाय निवेदयेत्। अनेनैव तु मंत्रेण क्षीरधेनुं प्रकल्पयेत्। अनेन गुडधेनुकेन प्रक-
ल्पयेद्द्रव्यमंत्रयेत्। आप्यायस्वेति मंत्रेण क्षीरधेनुं प्रकल्पयेत्। गृह्णामित्वां देविभक्त्या माहकोमं त्रमुच्चरेत्।
एवं धेनुं प्रदत्वा च क्षीराहारो दिनं चरेत्। त्रिरात्रं तु पयोभक्ष्यो ब्राह्मणो राजसत्तम। मंत्रस्तु गृह्णामित्वां देविभ
क्त्या कुटुंबार्थे विशेषतः। भरस्व कामैमां सर्वैः क्षीरधेनुं नमोस्तु त इति। एतां हेमसहस्रेण शतेनाप्यथवा शा-

दानम:
॥२२५॥

क्षितः ॥ दद्याद्धेनुं महाराज शृणु तस्यापि यत्फलं ॥ दिव्यं वर्षसहस्रं तु रुद्रलोके महीयते ॥ दिव्यवर्षसहस्राधिकरुद्र
लोककाम इति फलोल्लेखः संकल्पवाक्येऽत्र कुड धेनुतः ॥ अथ दधिधेनुः ॥ तत्रैव भूम्यां लेपनकुशकृष्णाजि
नास्तरणान्युक्ता ॥ दधिकुंभं च संस्थाप्य सप्तधान्यस्य चोपरि ॥ चतुर्थांशेन वत्सं तु सौवर्णमुखसंयुतं ॥ प्रश
स्तपत्रश्रवणामुक्ताफलमयेक्षणां ॥ चंदनागुरुशृंगां तां चमुखं वै गंधमालिकां ॥ गंधमालिका गंधद्रव्यविशे
ष इति बह्वृचः ॥ जिह्वां शर्करया राजन् घ्राणं श्रीखंडकं तथा ॥ फलमूलमया दंताः सितसूत्रस्य कंबलं ॥ ताम्र
पृष्ठा दर्भरोमा पुच्छं सूत्रमयं तथा ॥ स्वर्णशृंगी रौप्यखुरी नवनीतमयस्तनी ॥ इक्षुपादां सुसंस्कृत्य सर्वाभर
णभूषितां ॥ आच्छाद्य वस्त्रयुग्मेन पुष्पगंधैः सुपूजितां ॥ ब्राह्मणाय कुलीनाय साधुवृत्ताय धीमते ॥ पुच्छदेशो
पविष्टाय मुद्रिकाकर्णमात्रकैः ॥ पादुकोपानहौ छत्रं दत्वा मंत्रमनुस्मरेत् ॥ मंत्रो गुडधेनूक्तः ॥ दधिक्रावोति
मंत्रेण दधिधेनुं प्रदापयेत् ॥ एवं दधिमयीं धेनुं दत्वा राजर्षिसत्तम ॥ एकाहारो दिनं तिष्ठेद्भाचन्द्रपनंदन ॥ य
जमानोवमेराजन् त्रिदिनं च द्विजोत्तम ॥ यत्र मधुवहा नद्यो यत्र पायसकर्दमाः ॥ मुनयो ऋषयः सिद्धास्तत्र गच्छं

दानम:
॥६७८॥

ति धेनुदाः ॥ दातारो दायकाश्चैव ते प्रियांति परां गतिं ॥ मधुनदीकबकूपाय कृषिभिर्लोककाम इति शेषं फ
लोल्लेखः ॥ अथ मधुधेनुं स्कांदे ॥ मधुधेनुं प्रवक्ष्यामि सर्वपापप्रणाशिनीं ॥ अनुलिप्ते महीपृष्ठे कृष्णाजिन
कुशोत्तरे ॥ धेनुं मधुमयीं कृत्वा संपूर्णघटपूरितां ॥ तच्चतुर्थभागेन वत्सकं परिकल्पयेत् ॥ सौवर्णं तु मु
खं कृत्वा शृंगाण्यगुरुचंदनैः ॥ पृष्ठं ताम्रमयं तस्याः पुच्छं सूत्रमयं तथा ॥ पादाश्चेक्षुमयाः कार्याः सितकंब
लकंवलं मुखं गुडमयं कृत्वा जिह्वा शर्करयान्विता ॥ मौक्तिकं नयने तस्या दंताः फलमयास्तथा ॥ दर्भरोमध
रा देवी रौप्यखुरविभूषिता ॥ प्रशस्तपत्रश्रवणा नवनीतमयस्तनी ॥ सर्वलक्षणसंयुक्ता सप्तधान्यानि दापये
त् ॥ चत्वारि तिलपात्राणि चतुर्दिक्षु च विन्यसेत् ततः ॥ आच्छाद्य वस्त्रयुग्मेन घंटाभरणभूषितां ॥ कांस्योपदोहिनीं
कृत्वा गंधपुष्पैस्तु पूजितां ॥ पुच्छदेशोपविष्टाय ब्राह्मणाय प्रतिपादयेत् ॥ उदपूर्वं तु कर्तव्यं पश्चाद्दानं समाचरेत्
स्मजाः सर्वदेवानां सर्वभूतहिते रता ॥ प्रापतां पितरो देवा मधुधेनो नमोऽस्तु ते ॥ एवमुच्चार्य तां धेनुं ब्राह्मणाय नि
वेदयेत् ॥ स्वयं गच्छामि त्वां देवी कुटुंबाय विशेषतः ॥ कामान् कामदुधे त्वं च मधुधेनो नमोऽस्तु ते ॥ मधुवातेति

दानम०

२२६

मंत्रेणाप्रदानप्याप्य च चेतसा । दत्वा मधुपायसं तस्मै यजमानो दिनं नयेत् । ब्राह्मणोपि तथैव त्रिदिनं नयेत् । फल
श्रुतिरपि यत्र मधुवत्दान घोयत्र पायसकर्दमाः । ऋषयो यत्र गच्छंति धेनुदाः । तत्र गोगावरान्
मुक्त्वा ब्रह्मलोके सति हसिम धुनदी कवचपायसकर्दम मुनिसिद्धलोकोत्तम गोगोत्तर ब्रह्मलोककाम
इति विशेषफलोल्लेखः । अथ रसधेनुः स्कांदे रसधेनुं महाराज कथयामि समासमास मा तः । अनुलिप्ते मही
पृष्ठे कृष्णाजिनकुशोत्तरे । रसस्य तु घटं राजन् संपूर्णं मैत्रवस्त्रपुन्तं तद्वत् कल्पयेत्प्राज्ञश्चतुर्थांशेन तत्समं इ
क्षुदंडमयाः पादाः राजतखुरसंयुता । सुवर्णशृंगाभरणा वस्त्रपुच्छा घृतस्तना । पुष्पकंबलसंयुक्ता शर्करामु
खजिह्विका । दंताः फलमयास्तस्याः पृष्ठं ताम्रमयं शुभं सुप्ररोमा तराजेंद्र मुक्ताफलकृतेक्षणा । समन्ताद्व्रीहिसमायु
क्ता चतुर्दिक्सदा का । सर्वोपस्करसंयुक्ता सर्वगंधविभूषिता चत्वारि तिलपात्राणि चतुर्दिक्षु निवेशयेत् । धेनुत
पूजयित्वा मेघुष्यगंधस्त्रगादिभिः । पूर्वोक्ताः पंचमंत्राश्च ता नेव प्रयतः स्मरेत् । मंत्रा गुडधेनूक्ताः । एवमुच्चारयि
त्वा तु दीयते वै द्विजोत्तमे । दशपूर्वान्परांश्चैव आत्मानं चैकविंशकं । नयेत्तु परमं स्थानं यस्मान्नावर्त्तते पुनः । दा राम: ॥६७॥

ता वायाहको वापिकाहारसमोजकः । सोमपानं भवेत्तत्र सर्वक्रतुफलं भवेदिति । श्रीसाधिकदशपूर्वदश
परपुरुषाणां निवृत्तिरहितपरपदप्राप्तये आत्मनश्च सोमपानसर्वक्रतुफलप्राप्तिकाम इति विशेषफलोल्ले
खः । अथ शर्कराधेनुः स्कांदे । तद्वच्छर्कराधेनुं शृणु राजन्यथार्थतः । अनुलिप्ते महीपृष्ठे कृष्णाजिनकुशोत्त
रे धेनुः शर्करया राजन्स्याद्भारचतुष्टयं । तत्तमा कल्पते सद्भिश्चतुर्थांशेन वत्सक । अथ षष्टांशतः कुर्याच्चतुर्थां
शेन वत्सकं । अष्टांशात इति भारचतुष्टयस्याष्टमांशेन अर्द्धभारेणेत्यर्थः । त्वशक्त्या कारयेद्धेनुं आलये पाड
न कारयेत् सर्वबीजानि संस्थाप्य चतुर्दिक्षु समंततः । सौवर्णमुखशृंगाणि मौक्तिकैर्नयनानि च । गुडेन मुंचेरबंका
यंजिका पिष्टमयी तथा । कंबलं पट्टसूत्रेण कंबलाभरणभूषिता । इक्षुपादा रौप्यखुरा नवनीतमयस्तना । प्रश
स्तपत्रश्रवणा सितचामरभूषिता । पंचरत्नसमायुक्ता दर्भरोमसमन्विता । कांस्योपदोहना सम्यग्गंधपुष्पै
समन्विता । इति दिग्विधानसंयुक्ता वस्त्रैराच्छादितोपरि गंधपुष्पैरलंकृत्य ब्राह्मणाय निवेदयेत् । श्रोत्रियाय
दरिद्राय साधुवृत्ताय धीमते वेदवेदांगविदुषे विशेषेणाग्निहोत्रिणे । अनस्य वै प्रदातव्या नमत्सरयुता यदे

अयने विषुवे पुण्ये व्यतीपाते च षण्मुख। रामपुण्येषु कालेषु इच्छया वापि दापयेत्। सत्पात्रं तु द्विजं दृष्ट्वा स्व-



गृहं श्रोत्रियं गृहे। तादृशाय प्रदातव्या पुच्छदेशे निवेदयेत्। पूर्वामुखः स्थितो दाता अथवाप्युदङ्मु-
खः। धेनुं पूर्वमुखीं कृत्वा वत्सं चोत्तरतो न्यसेत्। दानकाले तु ये मन्त्रास्तान्निवित्वा समर्चयेत्। गुडधेनु-
का। आच्छाद्य चैव तं विप्रं मुद्रिका कर्णवेष्टनैः। स्वशक्त्या दक्षिणां दद्याद्धूपपुष्पं सचन्दनं। धेनुं समर्चये-
न्मुखं च न विलोकयेत्। एकाहं शर्कराहारो ब्राह्मणस्त्रिदिनं वसेत्। सर्वपापहरा धेनुः सर्वपापप्रदायिनी
सर्वकामसमृद्धा स्यात्तापते नात्र संशय इति। अथ कार्पासधेनुः वाराहे। अतः परं प्रवक्ष्यामि धेनुकार्पा-
सकामुत्तमं सर्वविघ्नप्रशमनं ब्रह्मणा वापि कं कृतं कार्पासस्य तन्तुस्थापितेनासा कुत्तमस्मृता। सा च कर्पास-
भारेण धेनुः श्रेष्ठा प्रकीर्तिता। मध्यमा च तदर्धेन कनीयसा। पूर्ववद्वस्त्रधान्यं च हिरण्यं च तथैव च। वत्सकं
तु चतुर्थांशाद्दानमन्त्रोऽभिधीयते। कुर्वीत पूर्ववद्वत्सं वस्त्रधान्यापस्कृतं पूर्ववद्वाराहोक्त तिलधेनुदान- रामः
वत्। हैमं कुंडं ऽसम शोधनार्णवसमुद्भवे। सोमप्रियेऽस्तु धेन्वाख्ये सौरभेयी नमोऽस्तु ते। दत्त्वेयमिंदुना ॥६८॥

पापशशांकायान्नतायच अत्रिनेत्रप्रजाताय सोमराजाय वै नमः। यस्त्वेवं परया भक्त्या ब्राह्मणाय प्रयच्छ-
ति स याति चंद्रलोकं तु सोमेन सह मोदत इति। चंद्रलोकगमनानंतरं चंद्रसहावासस्तुस्वकाम इति विशेष-
फलोक्तेस्त्व। अथ भविष्यत्पुराणोक्त वर्णधेनुः। तत्र युधिष्ठिरं प्रति कृष्णः। शृणु राजन्प्रवक्ष्यामि लवण-
स्येह कल्पितं। गोमयेनानुलिप्ते तु दर्भसंस्तरसंस्थितं। आविकं चर्म विन्यस्य पूर्वाग्रीवमुखं स्थितं। वस्त्रे-
ण छादितं कृत्वा धेनुं कुर्वीत बुद्धिमान्। आढकेनैव कुर्वीत वत्सं वित्तवानपि। स्वर्णशृंगी रौप्यखुरां इक्षु-
पादां फलस्तनीं। कार्या शर्करया तिह्वा गन्धघ्राणवती तथा। समुद्रो दरजां शुक्तिं वर्णां च परिकल्पयेत्। शृं-
गे च दंतकाष्ठाभ्यां मौक्तिके वाक्षिणी नेत्रे कपोलौ सक्तुपिंडाभ्यां यवानास्ये प्रदापयेत्। कंबलं पट्टसूत्रेण
ग्रीवायां छत्रिका तथा। एवं वै ताम्रपात्रं तु अपाने गुडपिंडकां। लांगूले केवलं दद्यात् समानं क्षीरप्रदेशतः।
योनिप्रदेशे तु मधु सर्वतिक्तफलान्वितं। एवं सम्यक्परिकल्प्य पल्लवरत्नपाहस्तां तु गां स्थापयेद्वत्सकं वा-
पि च तु भागेन मानवाः। एवं धेनुं समभ्यर्च्य माल्यवस्त्रविभूषणैः। स्नात्वा देवार्चनं कुर्यात् ब्राह्मणान्निम-

ज्य च कृत्वा प्रदक्षिणं गां तु पुत्रभार्यासमन्वित॥ दानमंत्रः॥ लवणा वै रसाः सर्वे लवणे सर्वदेवता॥ सर्वदेवमये दे
वि लवणाख्ये नमोस्तु ते॥ प्रदक्षिणाम् शतेन कृता नवा ॰ति भारत सर्वदानानि दत्तानि सर्वर्तुकफलानि तु॥ स
वै रसाः सर्वमंत्राः सर्वमेतच्चराचरं सौभाग्यं च परां वृद्धिं॥ शरीरारोग्यसंपदः॥ लभते भवति दत्वा तु रसधेनुं नरः सं
शयः॥ सौभाग्यं परमं वृद्ध्यारोग्यकाम इति विशेषफलोल्लेखः॥ पुराणांतरे गां लवणमयीं कृत्वा षोडशप्रस्थसं
युतां॥ चतुर्भिस्त्रिराजेंद्रेत्यादिना लवणपरिमाणांतरमित्युक्तं॥ अथ सुवर्णधेनुः॥ विष्णुधर्मोत्तरे॥ भगवानुवाच॥
यद्गुल्मणापि राजेंद्र उद्दितं विष्णुना पुरा॥ तत्ते विस्तरतो राजन् कथयाम्यनुपूर्वशः॥ सुवर्णस्य सुवर्णस्यतु
ष्टस्य परिकल्पितं॥ एकं सुवर्णपट्टेशोभने रूपमाद्यापरं मानं॥ रौप्यवत्सकसंयुक्तां मुक्ताफलसमन्वितां॥ प्र
वालश्रृंगीं गोपदितां पद्मरागादिशालिनी॥ घृतपात्रस्तनवतीं कर्पूरागरुनासिकां॥ शर्करारसनोपेतां मिष्टान्नर
सवासितां॥ शंखश्रृंगांतरां शुक्तिं ललाटस्थानकल्पितां॥ फलदंतां वस्त्रयुग्मपार्श्वां क्षौमपुच्छकंबलां॥ इक्षुपा
दां नालिकेरश्रवणां गुडजानुकां॥ पंचगमापारवंतां कांस्यापादप्रत्यांगलां सप्तधान्यसमन्वितां॥ फ



लपुष्पसमोपेतां छत्रोपानत्समन्वितां॥ सुवर्णधेनुं विप्राय प्रतिपाद्येह शौवर॥ हिरण्यरेताः पुरुषः पुराणः
पिंगलः॥ तस्य हेमच्छविः स्रष्टा विष्णुर्मा प्रीयतामिति॥ अनेनैव तु मंत्रेण धेनोर्दानं प्रकीर्तितं॥ अश्वमेध
सहस्रस्य फलमाप्नोत्यसंशयं॥ कुलानां च सहस्रं च स्वर्गं नयति तद्बुध इति॥ अश्वमेधसहस्रतुल्यफलप्राप्ति
न सहस्रस्वर्गनयनकाम इति फलोल्लेखः॥ वह्निपुराणे तु॥ सुवर्णधेनुस्त्वाप्यत्र सुवर्णाश्च चतुर्दश॥ सुनिर्मि
सुवर्णौश्चैव समनिर्मध्यमा मता॥ चतुर्भिः कनीयसी प्रोक्ता चतुर्थांशेन वत्सका॥ गुडधेनुविधानेन दत्ता सर्वफल
प्रदेत्यादिना सर्वं गुडधेनुवदुक्तं॥ अथ वायुपुराणोक्तं वंध्यात्वहरं सुवर्णधेनुदानं॥ चतुर्विध्या तु यो वंध्या भवे
त्स वियोजनात्॥ चतुर्विधा॥ वंध्या च काकवंध्या च मृतवत्सा प्रसूस्रवंतजेति॥ वंध्या अपत्यसामान्याभाववती
काकवंध्या काकवदेकापत्या॥ वत्से तस्याः प्रतीकारं तत्स्वरूपं निबोध मे॥ हिरण्येन यथाशक्त्या सवत्सां कार
येद्दृढां॥ धेनुं पलेन वत्सं च पादेन गुरुरब्रवीत्॥ धेनुं रौप्यखुरां रत्नं तस्याः पुच्छे नियोजयेत्॥ घंटां गले च ब
ध्नीयात्तिलकं चोभयोरपि॥ अवर्ये द्विदिनं तु नैवेद्यं पायसं भवेत्॥ मोदकांश्च ततो पूपान्गुडं लवणमे

वच॥ नारकं चतुर्विंशैर्मूर्पे विष्णुमये दृढे॥ धेनोरेकं प्रदातव्यं ब्राह्मणं स्त्रीषु चैव हि॥ षडशीतिदश वा दद्यान्न
दनंतमेव च॥ ब्राह्मणं सर्वशास्त्रार्थकुशलं धर्मवेदिनं॥ विद्याविनयसंपन्नं शांतं दांतं जितेंद्रियं॥ अग्निहो
त्रपरं सर्वजनप्रियं कल्मषवर्जितं॥ स्नात्वा कृत्वा न्यासं पूज्य वस्त्राद्यैर्ब्राह्मणं पुष्पकैः॥ तेनैव कारयेत्सूज्ञामाहुती धेनु
वत्सयोः॥ होमं च कारयेत्तत्र समिदाज्यचरूत्कटं॥ सोमो धेनुमिमं मंत्रं समुच्चार्य ततः पुनः॥ प्राङ्मुखायोपविष्टा
य प्रदद्यात्तां उदङ्मुख॥ मंत्रेणानेन विधिवत्पुच्छे हस्तं निधाय च॥ धेनुर्यां गिरसा सत्येव सिद्धे सुरभीचया॥ उदि
ता च तथा भानोर्नग्न श्ररुणाय च॥ या स्वगा वः प्रवर्त्तंति वने पूपवनेषु च॥ प्रारंगा तु ताममसदा पुत्रपौत्रप्रवर्द्धना॥ प्र
यच्छं तु दिवारात्रमविच्छेदं वसंततेः॥ वंध्यात्वं काकवंध्यात्वं कन्याप्रसव एव च॥ तथैव मृतवत्सात्वं दोषं मम चतु
र्विधं॥ हनेनानेन हरतु या सा कामदुघा न घेति॥ अथ पत्रस्य योगे दानं॥ तत्र याज्ञवल्क्यः॥ यथा कथंचिद्दत्वा गां धे
नुं वा धेनुमेव च॥ अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते॥ जाबालः॥ होमार्थमग्निहोत्रस्य यो गां दद्याद्दया॥
न्वितां॥ त्रिर्विनिपूर्णं पृथिवी तेन दत्ता न संशयः॥ गौरेकस्यैव दातव्या श्रोत्रियस्य विशेषतः॥ सा हि तारयते प्र



र्वान्सप्तसप्त कुलानि वै॥ आत्रेयः॥ मीदते बहुरूपसाय श्रोत्रियाहिताग्नये॥ अतिथिप्रियाय दांताय देया धेनुर्गुणा
न्विता॥ सुशीलां लक्षणवतीं युवतीं वत्ससंयुतां॥ बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणः॥ व्यासः॥ संग्रा
मे धर्जयित्वा तु यो वै गां संप्रयच्छति॥ यादृत्रीः स्पर्शयेत्तावत्तावत्फलमश्नुते तावत्तत्रैरोममितवत्सरा
स्वर्गफलं॥ यो वै द्यूते धनं जित्वा गाः क्रीत्वा संप्रयच्छति॥ स दिव्यमयुतं शक्रवर्षाणां फलमश्नुते॥ नारदः॥ न गोदा
नात्परं दानं किंचिदस्तीति मे मतिः॥ सा गौर्न्यायार्जिता दत्ता कृत्स्नं तारयते कुलं॥ तथा॥ अकुलीनाय मूर्खाय
लुब्धाय पिशुनाय च॥ हव्यकव्यव्यपेताय गौर्न देया कथंचन॥ तृणानि खादंति चरंतरण्ये पिबंति तोयानि मपरि
ग्रहाय॥ दुह्यंति वा ह्यं पुनंति पापं गवां रसैर्जीवति कोऽत्र शंसा॥ अथ विधिः॥ याज्ञवल्क्यः॥ हेमशृंगी शफै रौप्यैः
सुशीला वस्त्रसंयुता॥ सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा॥ गौः सदक्षिणा॥ विश्वामित्रः॥ प्राङ्मुखां गामव
स्थाप्य सवत्सां गां सुपूजितां॥ पुच्छे देशे तु दाता वै स्नातो बद्धशिखो भवेत्॥ उदङ्मुखस्तु विप्रस्यात् पात्रल
क्षणलक्षितः॥ आज्यपात्रं करे कृत्वा कनकेन समन्वितः॥ निक्षिप्य पुच्छं तस्मिंस्तु घृतदिग्धं ग्रग् हस्त सतिलं

दानम० ॥१३०॥ विप्रपाणिं च प्राप्यार्थं तु शृंगयं तु निधापयेत्। सतिलं सकुशं वापि गृहीत्वा दानमाचरेत्। अनेनैव तु मंत्रेण पा
त्रं हस्तेन लेक्षिपेत्। मंत्रो वक्ष्यते अनुवत्स्यच तां धेनुं ब्राह्मणेन समन्वितां। गोतमां तु ततो विद्यां जपेत। प्रय
तःशुचिः। उद्दिश्य वासुदेवं च प्रीयतामितिवानघ। पात्रं मनसि संचिंत्य तिर्यग्गस्तु विनिक्षिपेत्। अथ प्रयो
गः॥ अद्येत्यादि गोमात्र दाने स्वर्गकामः। सवत्स धेनु दाने स्ववत्स धेनु रोममित वर्षावधि स्वर्गकामः। अग्नि
होत्रायदाने तु वित्तपूर्णत्रिवार पृथिवीदान फल तुल्य फलकामः। सर्वत्रापि कुलतारणकामः। सर्व
पापक्षयकामो ईश्वरप्रीतिकामो वा गोदानं करिष्यतिसंकल्प्य प्राङ्मुखो सवत्सां गां विप्रं च संपूज्य सस्तु वर्णमि
त्यपात्रं गृहीत्वा हस्तेन पुच्छं घृताक्तं कृत्वा विप्रहस्ते कुशतिलजलान्यादाय तत्तत्फलेप्सुरभिलषितंफ
लमुत्काय यज्ञसाधनभूताया प्रणाम्शिना। विश्वारूपधरो देवः प्रीयतामनयागवेति मंत्रं घृतक्षीरमदागावो
घृतयोन्यो घृतोद्भवा। घृतनद्यो घृतावर्तास्ता मे संतु सदा गृहे। घृतं मे हृदये नित्यं नाभ्यां प्रतिष्ठितं। घृतं मे सर्वत रामः
श्चैव गवां मध्ये वसाम्यहमिति पौराणसंत्रेच पठित्वा जलमुत्सृजेत्। दानप्रतिष्ठार्थं दक्षिणां दत्वा ब्राह्मणाधे ॥६९३॥

नु अनुव्रज्य गावः सुरभयो नित्यं गावो गुग्गुलुगंधिकाः। गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्। अन्नमेव
परं गावो देवानां हविरुत्तमं। पावनं सर्वभूतानां रक्षंति च वहंति च। हविषा मंत्रपूतेन तर्पयंत्यमरान्दिवि। ऋषीणा
मपि होमे प्रतिष्ठिता। सर्वेषामेव भूतानां गावः शरणमुत्तमं। गावः स्पन्नो कस्य गावो धन्याः सनातनाः॥ नमो गोभ्यः
श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः। ब्राह्मणाश्चैव गावश्च कुलमेकं द्वि
धा कृतं। एकत्र मंत्रास्तिष्ठंति हविरेकत्र तिष्ठति। इत्यादि यमोक्तं गोमतीविद्यां जपेत्। महाभारतेपि गोमती। गावो मा
मुपतिष्ठंतु हेमशृंग्यः पयोमुचः। सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा। गा वै पश्याम्यहं नित्यं गावः पश्यंतु
मां सदा। गावोस्माकं वयं तासां यतो गावस्ततो वयमिति। गावो ममाग्रतः संतु गावो मे संतु पृष्ठतः। गावो मे हृदये संतु गवां म
ध्ये वसाम्यहमिति पठित्वा धेनुं द्विजे च प्रदक्षिणी कृत्य दद्यादिति पिबंदंति दक्षिणामाह वसिष्ठो दानप्रकरणे
सुवर्णं परमं दानं सुवर्णं दक्षिणा परा। सुवर्णं पावनं प्राहुः परिमाणं परं तथेति। यजमानस्ततो दद्याद्यथाश
क्त्या तु दक्षिणामिति तत्र शाकपरमिति मदनः। अथ मामे देमं अंगी। दत्वासौ वसिके शृंगे खुरा यं च पञ्ज

दानम० ॥२३१॥

स्थिता। पंचाशत्पलिकं कांस्यं ताम्रं वापि तपेयं च। दातास्याः सर्वमाप्नोति यावदाहूतिसंप्लवं। सुवर्णमत्र दक्षि
णाः इति हेमशृंगीदानं। शिवाय विष्णवे वापि यस्तु दद्यात्पयस्विनीं। धेनुं स्नानोपहारार्थं स परं ब्रह्म गच्छतीति
स्कांदे। देवताभ्यो गोदानं। वृषभं गोशतं दद्याच्छिवायातीवशोभनं। त्रिःसप्तकुलजैः सार्धं शृणुतत्त्वदमाखु
पादित्यादिना शिवधर्मोक्तं शिवाय वृषाधिकगोशतदानं। देवताभ्यो दाने देवतैः संप्रदानं। ब्राह्मणः दत्तं चेत
त्तद्देवतायतने दक्षिणा गोस्थाप्यमिति दानसौख्ये। अथोभयतोमुखी मात्स्ये। रुक्मशृंगी रौप्यखुरां सुता
लांगूलभूषितां कांस्योपदोहनां राजन्सवत्सां द्विजपुंगवे। प्रसूयमानां यो दद्याद्धेनुं द्रविणसंयुतां। यावद्व
त्सो योनिगतो यावद्गर्भं न मुंचति। तावद्गौः पृथिवी ज्ञेया सशैलवनकानना। देवलः अलंकृत्योक्तविधिना सुव
र्णत्रिपलान्विता। दातव्या द्विपला मध्यैकपला कन्यसी मता। वाराहे। यश्चाननमुखीं दद्यात्सघृतकनका
न्वितां। तद्दिनं पापसंहारः पयसा वातिवाहयेत्। सुवर्णस्य सहस्रेण तदर्द्धेनापि वा पुनः। तस्याप्यर्द्धशतं वापि पं
चाशच्च तथा धनं। यथाशक्त्यापि दातव्यं वित्तशाठ्यं विवर्जितं। योगात् सवत्सारोमतुल्यानि युगान्युभयतोमुखी

रामः ॥६८॥

दातास्य स्वर्गमाप्नोति पूर्वेण विधिना ददत्। मात्स्ये। गोलोकमुत्तमं तस्य ब्रह्मलोकश्च भारत। स्त्रियपस्त्रिय-
श्चंद्रसमानवक्त्राः प्रतप्तजांबूनदतुल्यवर्णाः महानितंबस्तनवृत्तमध्या भजंत्यजस्रं नलिनाभनेत्राः इति। अथ प्र
योगः अद्येत्यादि गृहसमुद्रशैलवनोपेतपृथिवीदानसमफलप्राप्तये तद्धेनुवत्सरोमसंख्ययुगदेवलोकमहीत
त्वपितृपितामहनरकोद्धरणघृतक्षीरबहुकल्याकदधिपायसकर्दमदेशाधिकरणकेप्सितकामगत्वात्म
लोकसुलभत्वब्रह्मलोकसुलभत्वाजस्रचंद्रसमानवक्त्रसुतप्तजांबुनदतुल्यवर्णमहानितंबस्तनवृत्तमध्यन
लिनाभनेत्रानेकस्त्रीसेव्यमानत्वकाम उभयतोमुखीदानम् इति संकल्प्य। ॐ त्वं महिमवति विम्बधेनाऊवीत
ये वध्या पह्वरंती। अरमयोनममैजदर्शस्तुतरणाम हरणोरि धून्निति गामनुमंत्र्य विप्रं वस्त्रादिभिर्गां च सुव
र्णशृंगरौप्यखुरादिभिरलंकृत्य गंधादिनाभ्यर्च्य सगृहेत्यादिकाम इतंतप्रयोगाते इमां सोपस्करामुभय
तोमुखीं गां रुद्रदैवतां अमुकगोत्राया अमुकशर्मणे ब्राह्मणाय करे दद्यात्। विप्रस्तु विवत्सां तिगृह्य तु स्वस्ति सु
रुक्मा गोपुच्छं स्पृष्ट्वा दत्तां दक्षिणां च प्रतिगृह्य स्पृष्ट्वा इरावती धेनुमती स्यान पृथिवी भवेति मंत्रं जपित्वा

दानम०
॥१३२॥ प्रतिगृह्णामि त्वां धेनुं कुटुंबार्थे विशेषतः। स्वस्तिर्नेर्वंतु मे नित्यं रुद्रमातर्नमो नम इति मंत्रेण गृहीतायां दक्षि
णेन पाणिना नगचैतु समन्वेषाम वेदमहं देवानां जनिमानि विद्म शतमानपुनश्चापसीररक्षन धरूपेनो
जपत्वा निरटायमिति मंत्रेण गर्जैभाकृष्येत। अनंतरकृत्यमाह च्यवनः। निष्क्रांतेस्मिन्नुपसमाधाय देवान्
पितृन्नदीः पर्वतान्वनस्पतीनुदधीन्नागान् ओषधीस्तर्पयेत्। तत्र क्रमेण मंत्राः। ये देवासो। उशंतस्त्वाव
इमं मे गंगे०। अद्रिभिः सुता मे निविम्यनो हितः। वनस्पते समुद्रज्ये ष्टाः। अहिरिव भोगैः। मधुवाता इति। तदनु
पृथिवीं तर्पयेत्। इलेद्यावा०। महीद्यौ०। उर्वी पृथ्वी गौरी मिमाय०। ततस्समस्तव्याहृतिभिश्चतुरशीत्याहुतीर्हुत्वा
ब्राह्मणान्भोजयित्वा स्वस्त्ययनं वाचयित्वा गामनुव्रज्य प्राग्युक्तां गोमतीं विद्यां जप्त्वा पायसान्नं भुंजीत। इत्थं नय
तो मुख्वी गोदानं भारते। इतिकंवमड्डासर्वरलंकृतं दत्वा प्रजापतिलोकान् विशोकप्रतिगृह्यत इति सुवर्णशृंग
रौप्यखुरां गृहीत्वानिकमपि भारतोक्तं बोध्यं। इतिकंवमबलगकंबलं अथ वैतरणीप्रस्तावे वर्त्ते धामा वैतरणी
नाम यमद्वारे महानदी। शतयोजनविस्तीर्णा पृथुत्वेसा महासरित्। अगाधानंतरूपा च दृष्टमात्रा या वहा। तया रामः ॥६८५॥

पतंति तत्र वै मर्त्याः क्रंदमाना सुदारुणां। तच्छृणुष्व नरव्याघ्र कथ्यमानं युधिष्ठिर। अयने चैव विषुवे पुण्ये व्यती
पाते दिनक्षये वा पाटलामथवा कृष्णां कुर्याद्वैतरणीं शुभां। स्वर्णशृंगीरौप्यखुरां कांस्यपात्रसदोहनां। कृष्णवस्त्रयुग
च्छन्नां सप्तधान्यसमन्वितां। कार्पासद्रोणशिखरे आसीनां ताम्रभाजने। यमं हैमं प्रकुर्यात् लोहदंडसमन्वितं। म
हामहिषमारूढं दक्षपाणौ करे इक्षुदंडमयं च द्वाउडुपं बंधनैः। उडुपोपरि तां धेनुं सूर्यदेहसमुद्भवां
कृत्वा प्रकारायेद्विद्वान् छात्रोपानद्धनसंयुतां। इमम् उच्चारयेन्मंत्रं संगृह्योदकमंजलिं। अथ प्रयोगः। पूर्वोक्ता
यनादिकाले मत्स्यकाले वा पाटलीं कृष्णां वा हेमशृंगाद्युपेतां कृष्णवस्त्रयुगच्छन्नां सप्तधान्यसंयुक्तां छत्रोपान
द्युगलसंयुतां गां संनिवाप्य द्रोणमितकार्पासशिखरे ताम्रपात्रे तत्र च महिषारूढं दक्षिणे वा महस्ते धृतलोहदंड
उपात्रं हैमं यमं स्थापयित्वा दक्षे पट्टबद्धेक्षुदंडनिर्मितप्लवोपरि तां धेनुं स्थापयित्वा उदङ्मुखं प्रतियदीतारं उप
देशयं प्राङ्मुखः। यमद्वारे महाघोरायासा वैतरणी नदी। तर्तुकामो ददाम्येनां तुभ्यं वैतरणीं च गामिति मंत्रेण गा
मधिवासयेत्। ततः। ०तिथ्यादि संकीर्त्य वैतरणीं तर्तुं गां दास्य इति संकल्प्य प्रतिमायामक्षतपुंजो वा विष्णुं

दानम०
॥२३३॥ गां विप्रं च संपूज्य उत्तंत्र घेत्यादि० अमुकगोत्रायामुकशर्मणे ब्राह्मणायेदं। यमद्वारेस्थितायानघा:सुरवेनो
त्तरणाय इमां वैतरणीं गां सवत्सां सोपस्करां हे मयमदूर्तिसंहितां विष्णुदैवतां संप्रददे। दानमंत्र:॥ विष्णुरूपद्वि
जश्रेष्ठ भूदेवपंक्तिपावन: सदक्षिणा मया तुभ्यं दत्ता वैतरणी च गौ: इति। तत: सुवर्णं दक्षिणां दत्वा तद्धेनो: पु
छं प्रगृह्यानुव्रजेत्। तत्र मंत्र: धेनुके त्वं प्रतीक्षस्व यमद्वारे महाभये। उत्तितीर्षुरहं देवि वैतरण्यै नमोनम: इ
ति वैतरणीदानं॥ अथ महिष्या:॥ भविष्योत्तरे॥ महिषीदानमाहात्म्यं कथयामि युधिष्ठिर। पुण्यं पवित्रमायु
ष्यं सर्वकामप्रदं सुखं। चंद्रसूर्यग्रहे पुण्ये कार्त्तिक्यामयने तथा। शुक्लपक्षे चतुर्दश्यां सूर्यसंक्रांतिवासरे।
यदा वा जायते वित्तं चित्तं च कुरुनंदन। तदैव देया महिषी संसारभयभीरुणा। प्रथमप्रसूता तरुणी सुशो
भा दोषवर्जिता। सुवर्णशृंगजलकाघंटाभरणभूषिता। रक्तवस्त्रावृता रम्या दात्रदोहनिकान्विता। पिण्याक
पिंडकोपेता सहिरण्या च शक्तित:। पिण्याकपिंडकं खलिपूर्णवंशादिपात्रं सप्तधान्यसुता देया ब्राह्मणे राम:
वेदपारगे ह्यैरेभि: समायुक्ता पुण्येह्नि विधिपूर्वकं। दद्यान्मंत्रेण राजेंद्र पुराणपठनेन तु। दद्यात्सदक्षिणा ॥६६६॥

ह्रस्य ब्राह्मणोत्तं पयस्विनी॥ प्रतिग्रह: स्मृतस्तस्या: पदप्रदेशोस्वपुंतु वा॥ दानवाक्यं तु अघेत्यादि इहाद्दिलोक
पालानां याराज्यमहिषादीनमाहात्म्यात् हेतुमे कामदा सदा॥ धर्मराजस्य माहात्म्ये यस्या: पुत्र: प्रतिष्ठित:॥ महि
षासुरस्य जननी या सास्तु वरदा मम इति मंत्रमुक्त्वा अमुकगोत्रायामुकशर्मणे ब्राह्मणाय इमां महिषीं सुव
र्णशृंगतिलकाभरणां घंटाताम्रदोहनिकां पिण्याकपिंटकसप्तधान्यपाउकोपेतां यमदैवतां आयुष्यमहारा
ज्यकमत्कस्य महं संप्रददे इति स्त्रीतु राजमहिषीत्वकामेति जयकाम इति क्षत्रिय: धनधान्यकाम इति वैश्य
एवं शूद्रेण पिस्वामिस्वरवितं फलमुद्दे रवं ईश्वरप्रीतिकाम इति वासवें। ततो दक्षिणां दद्यात् इति। अने
न विधिना दत्वा महिषीं द्विजपुंगवे सर्वान्कामानवाप्नोति इह लोके परत्र च॥ यास्त्वां ददाति महिषीं सा राजमहि
षी भवेत्। महाराज: पुमान्राजन् व्यासस्य वचनं यथा॥ पत्नयाजी भवेद्विप्रक्षत्रियो विजयी भवेत्। वैश्यस्तु धा
न्यधनवान् शूद्र: सर्वार्थसंयुत इत्यादिफलश्रुतिरपि तत्रैवोक्ता॥ इति महिषीदानं॥ अथ मेष्या:॥ भविष्योत्तरे॥
शृणु पार्थ परं दानं सर्वकिल्बिषनाशनं। यद्दत्वा विविधं पापं सद्यो विलयमृच्छति। सुवर्णरोमां सौवर्णीं प्रस

शांवासुरभी नंनां सुवर्णतिलकोपेतांसर्वालंकारभूषितं कौशेयपरिधानांचवस्त्रैश्चंदनभूषितां दिव्यपुष्पो
पहारांच सर्वधातुरसैर्युतां सप्तधातुसमायुक्तां फलपुष्पवतीं तथा शानकारयेत्तांतुसुवर्णस्यप्रय
त्नतः यथाशक्त्याचवाकुर्याद्वित्तशाठ्यंनकारयेत् अयनेविषुवेपुण्येग्रहणेचंद्रसूर्ययोः दुःस्वप्नदर्शा
नेचैवजन्मर्क्षेतिथिसंक्षये यदावाजायतेचित्तंवित्तश्रद्धासमन्वितं तदेवदानकालस्यात्तयतोनित्यंद्विजा
वितं दद्यात्तीर्थेगृहेवापियत्रवारमतेमतः वस्त्रसंस्थाप्यदेवेशासुमया सह शंकरं ब्रह्मणंसहगायत्र्या
सश्याकेश्रीधरंतथा रत्याम सह तथानंगंलोकपालान्यथा नपि तेषु पूज्य विधानेन गंधपुष्पनिवेदनैः उ
माशंकररूपं चर्मांबरश्चतुर्बाहुं शूलखट्वांगपाणिन्नतु वृषांक शंकरोगौरीवामोत्संगेस्थितान्वेदिति
ब्रह्मणायत्र्यादिरूपाणितुयथोक्तानि तानिचयथाशक्तिसौवर्णानिकार्याणि तदग्रेकारयेद्धोमंतिलाज्येन
मंत्रवित् ततः अलंकृत्यद्विजंशांतंवासोभिः परिपूज्यच तद्विगमंत्रैर्होमश्चकर्तव्योज्वलितेनले त तस्तांतिल 
कुंभस्थाः लालयणाभिमुखंस्थितां पूजयित्वा विधानेनमंत्रमेतमुदीरयेत् मंत्रप्रयोगेइदः एवमुच्चार्य 

मा समासाद्य पद्मैःदैः सह मोदते सर्वकामसमृद्धात्मा सर्वयज्ञफलंलभेत् तस्माद्दानंप्रयच्छस्वततः सर्वम
वाप्स्यसि मंत्रेणानेनविधिवद्दत्वांक्त्यस्वशक्तितः त्वं पूर्वंब्रह्मणासृष्टापवित्रंभवतीपरं त्वत्वसृतौस्थिता
यशास्तस्माच्छांतिकराभव प्रतिगृह्णीततांचैव पृष्टदेशे द्विजोत्तमः दानवाक्यंतुमदनीषादीनवतज्ज्ञेयं अजा
दिकंचमहिषंदत्वा विप्रायशक्तितः घृतक्षीरवहानद्योयत्रतत्रसमेधत इतिमहिषदानं इत्यजंदानं अ
थमेषदानं बौधायनः अग्नेमंधिभवेत्तस्ययत्नेतायेविनाशकः वस्यामितत्प्रतीकारंयथोक्तंब्रह्मणापुरा
पञ्चाईनतदईनतदर्द्धेनाथवापुनः राजतंकारयेत्कीम्पमग्रेवीहनमुत्तमं सौवर्णश्चखुराःकार्याःश्वेतव
स्त्रेणवेष्टयेत् श्वेतमाल्यैश्वेतगंधैर्धूपंदद्यात्सघृतकटं तंडुलोपरिसंस्थाप्यपुनस्तंपूजयेत्सुधीः तंडुलानांपरिमा
णंद्रोणद्वयमुदाहृतं आग्नेय्यांदिशिहोमश्चसमिदाज्यतिलैरपि आचार्येणविनीतेनसर्वदिनं वक्तव्ये
नचकर्तव्यस्तत्रमंत्रानिमान्शृणु अग्निर्मूर्द्धेतिमंत्रेणसमिद्धोमप्रशास्यते अग्नेनयेत्याज्यहोमोप्यग्निस्त्विति
लाहुतैः पंचाध्यायोक्तविधिनाचाग्निसंस्थापनंभवेत् अग्नेःप्रागुत्तरेदेशेशुभंकुंभंचविन्यसेत् प्रणीताम

दानम॰ ॥१३६॥

द्वपर्यंते कृते स्नानं विधीयते आपो हि ष्ठेत्यृषिभिश्च हिरण्यपेति चतुर्थकं पवमानानुवाकेन मार्जयेद्रोगिणं ततः ॥
ग्रानो वातानुशांतिवापि प्रकल्पयेत् तस्मै कृतवते रोगाः प्राप्नु रवायद्युदःसुरवः पूजिता यथा यथाग्नादद्या
त्तु सदक्षिणं देवानां यो मुखं हव्यवाहनः सर्वपूजितः तस्य त्वं वाहनं पूज्यं देवैर्महर्षिभिः ॥ अग्निमाद्यं
पूर्वकर्मविपाको ऽयं तु यन्मम मत्सवेना शायद्विपं ज वराग्निप्रं वर्द्धयेति ॥ दानमंत्र एवं विप्राय यो दद्याद्दस्ने वाहि
नमुत्तमं बलवानश्रिमान्मर्त्यो जिवेद्वर्षशतं पुनः ततः स्व बंधुभिर्विप्रैः स्नात्वा भुंजीत मानवः ॥ इति मेषदानं ॥
अथाचलदानानि ॥ मात्स्ये ॥ प्रथमो धान्यशैलः स्याद्द्वितीयो लवणाचलः ॥ गुडाचलस्तृतीयः स्याच्चतुर्थो हेम
पर्वतः पंचमस्तिलशैलः स्यात्षष्टः कार्पासपर्वतः सप्तमो घृतशैलः स्यात्रत्नशैलस्तथापरः राजतो न
वमस्तद्वत् दशमः शार्कराचलः ॥ दसे विधानमेतेषां यथावद्दतु पूर्वशः ॥ अयने विषुवे चैव व्यतीपाते दि
नक्षये शुक्लपक्षे तृतीयायामुपरागे शशिक्षये विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः शुक्लायां पंचद
श्यां वा पुण्यर्क्षे वा विधानतः ॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः तीर्थे वायतने वापि गोष्ठे वाप्यंगणे

रामः ॥[illegible]॥

तैर्दद्यात् ब्राह्मणाय कुटुंबिने ॥ नाभिभाषेत ततो दत्वा नमुखं चावलोकयेत् दुष्टप्रतिग्रहणतो विप्रो भवत्येव च
पातकी अपुत्रे जनते पुत्रमपुत्रो लभते धनं रत्नदानं सुनां कांता कीर्त्तिं च विपुलां जयेति ॥ अथ प्रयोगः ॥ उ
क्तायनादिकालेषु दैते पर्वादानाद्येत्यादि॰ सर्वपापक्षयपूर्वकं पुत्रधनकांतिकीर्त्तिप्राप्तिकामो मेषादानं क
रिष्य इति संकल्पयेत् ॥ ऽस्त्र मेतु तत्कृचितादनिष्टनिवृत्तिकाम इति विशेषः प्रतिमासुतं ऽलपुंजेषु च ॥ उमास
हितं शंकरं गायत्रीसहितं ब्रह्माणं श्रीसहितं श्रीधरं रतिसहितं मनंगं लोकपालान् ग्रहांश्च संपूज्य तत्तत्का
शाके मंत्रैराज्याहुतिं तिलैर्ष्टाविंशतिसंख्ययाहुत्वा सुवर्णतिलकाद्यलंकारकौशेयचंदनपुष्पसुव
र्णरूप्यादिसहधातु समरस फलयुतां मध्यस्थापित तिलकुंभां सन्मुखस्थापित लवणां मेषीं विप्रं च संपूज्य रो
मत्वक्प्रासमज्जाद्यैः सर्वोपकरणैः सह जगतः संप्रहृतामित्वामतः ॥ चार्घ्ययेप्सितं ॥ वाञ्छतः कंयजति तं यत्किं
चित्तमम दुष्कृतं तत्सर्वं विलयं यातु त्वद्दानोपसंचितमिति मंत्रमुक्त्वा तिथ्यादि संकीर्त्य सर्वपापक्षय पू
र्वकपुत्रधनकांतिकीर्त्तिप्राप्तिकामो ऽदुःस्वप्नसूचितानिष्टनिवृत्तिकामो वैदां मेषीं सर्वोपस्करयुतामंमुक

दानम०
॥१३५॥

शर्मणे विज्ञायाहं संप्रददे नमेति दत्वा विप्रेण यथाविधि प्रतियहे स्वतिदक्षिणां दद्यात् ॥ एवमेवसुवर्णमेषा देया
प्रतिग्रहाद्विप्रस्तं नाघणमुखवावलोकनेवर्जयेत् ॥ इति मेषीदानं ॥ अथाजादानं ॥ सुमंतुः ॥ अजापालो महीपालो
ह्यजादाने दिदिं गत ॥ अयने विषुवे चैव युगादौ ग्रहणे शुच ॥ अमावास्यामतादानं पौर्णमास्यां च शास्पतो विधि
तस्य प्रवक्ष्यामि विश्वामित्रेण निर्मितं ॥ रर्बरलोपसंपन्नां मध्यधान्योपरिस्थितां वस्त्रमाल्योपमाजीतु न्यूषितांप
युजानकां व त्रनेत्रांहेमशृंगीताम्रपृष्ठीं सदोहनां सवत्सांरौप्यपादां च कुशोदद्यात्तिलोदकं ॥ गोदानवस्त्र
पूजीतमंत्रेणानेन संयुत ॥ मंत्र ॥ वासो अजेश्वरोयज्ञसंपत्करेणु ने स्वर्णत्वं दत्तमे पापं जन्मांतरशतैः कृतमि
ति एवं समुच्चरेद्भक्त्या द्विजहस्ते लंक्षिपेत् ॥ प्रीयतां यज्ञनाथ्याय वासुदेवाय वै नमः ॥ एवं प्रदक्षिणीकृत्य सूर्यं
समवलोकयेत् ॥ ततश्च गच्छेत्स्वगृहं हरिसंस्मृत्य मानवः ॥ ये बालत्वे कृता पापाः कामतो वा प कामतः ॥ यौवने
वार्द्धके न्मादे प्रसंगेनापि पातकं ॥ अजादानस्य महात्म्यान्निष्पापो जयते नरः ॥ पुत्रपौत्रसमायुक्तः सदा चास्मति
ष्ठितः ॥ विष्णुधर्मोत्तरे ॥ उष्ट्रं वा गर्दभं वापि यः प्रयच्छंति सु द्विजे ॥ अजामुरं न्त्वं तु रंगमपात्रा न्यासमदक्षिणां ॥ अजकां

राम:
॥१६६॥

गणो मंडपं कारयेद्भक्त्या चतुरस्रसुदक्षुरवं ॥ प्रागुदक्प्लवणं तद्वत् प्राक्षुरवं वा विधानतः ॥ प्राच्यामुदीच्या वै
कमेव द्वारं न च वारिद्वाराणि त्वथ ॥ द्वारे कार्यश्चतोरणमप्येकमेवाघारपरिस्फुरा रत्नस्या ॥ मंडपोष्टादशहस्तोन्यथ
ऽरणसहस्ता स्मितपर्वते मिवेशायोगातः ॥ गोमयेनोपलिप्तायां न्यूनमा वा स्तीर्यवै कुशान् ॥ तन्मध्ये पर्व
तं कुर्यात् विष्कुंभैः पर्वतैर्युतं ॥ धान्यै द्रोणसहस्रेण न वेद्गिरिरिहोत्तमः ॥ मध्यमः पंचशतिकः कनिष्टः स्या
त्रिभिःशतैः ॥ मेरुर्महान्व्रीहिमयस्तु मध्ये सुवर्णवृक्षत्रयसंयुतः स्यात् ॥ वृक्षत्रयं मंदारपारिजातकल्प
वृक्षरूपं मध्ये कल्पतरुर्दक्षिणोत्तरयोर्मंदारपारिजातौ ॥ प्राक्तौ हरिचंदनसंतानौ स्थाप्यौ पूर्वपश्चिम
यो ॥ निवेशपौ सर्वशेषु लैविशेषाश्च करा चलइति ॥ वक्ष्यमाणवाक्यात् ॥ शार्कराचलदाने लावणेपा पूर्वेणमु
क्ताफलवज्रयुक्तौ याम्येन गोदक पुष्परागैः ॥ पश्चाच्च गारुत्मतनीलरत्नैः सौम्येन वैदूर्यसरोजरागैः ॥ सरोजरा
गः पद्मरागः ॥ मुक्ताफलादीनि च पूर्वादिदिगवस्थितराजतशृंगेषु निवेशपानि ॥ मंदारश्चारवंडखंडैर
न्वितः प्रवाललतान्वितः ॥ शुक्तिशिलातलस्थात्ब्रह्मा च विष्णुर्भगवान्पुरारिः ॥ दिवाकरोपत्रहिरण्य

दानम०
॥१२७॥

यःस्यात् मूर्द्धमवस्थागतमत्सरेण कार्यास्त्वनेकेचतथा द्विजौघा॥ ब्रास्तादिग्वृतिमाब्रह्मांउदाने॥ द्विजाःप
क्षिणोमुनयश्चैहै माः॥ अनेकदस्वरत्यादितिमदना॥ चत्वारिंशच्छृंगाणि च राजतानि बंधारोपि वृराजतःस्यात्॥ चा
द्वैरुतुवंशावृतकं दरस्तु घृतोदकप्रस्नवणाश्चदिक्षु॥ शुक्लांबराणंबुधरावलीस्यात्स्वर्वैणपीतानि च दद
क्षिणेन॥ वासांसि पीतानि च कर्बराणि रक्तानि चैवोत्तरतो घनाली॥ रूप्यादैद्रैवएववंशा॥ घृतमेतो दकं शु
क्लाद्यं बराणमेवमेघावली॥ रौप्यान्महेंद्रप्रमुखान्यथा थैसंस्थाप्यलोकाधिपतीन् क्रमेण महेंद्रादि
लक्षणं तु आदाने॥ नानाफलालीवसमंततःस्यान्म नोरमं मात्सविलेपनं च॥ वितानकं चोपरिपं चवर्णं
मम्लानपुष्पाभरणंसितं च॥ इंद्रंनिवेश्यामरशैलमध्यंमेरोस्तु विष्कंभगिरीन् क्रमेण॥ तुरीयभागेनचतुर्द्दि
दिशं तु संस्थापयेत्पुष्पदिलेवमाना॥ यात् प्रति विष्कंभपर्वतं तुरीयांशः॥ चतुर्थांशेन विष्कंभपर्वतान् का
रयेत्स्वर्णगिरितिलवर्णं च लेवक्ष्यमाणत्वात्॥ इति मंदरः वास्तवं तु एकेनैव चतुर्थांशेन चत्वारोपि विष्कंभ
पर्वताः॥ कार्या इति तत्रैव वक्ष्यते पूर्वेणमंदरमनेकफलैश्च युक्तं गणे॥ कनककल्पकं दंबबिंदुकामे
रामः
॥६५०॥

नकांचनमयेनविराजमानामाकारयेत्कुसुमवस्त्रविलेपनाद्य॥ क्षीरारुणोदसरसा वचनेन चैव रौप्येण
शात्किघटितेन विराजमानं॥ कामरूपमाद्विश्वकर्मं चापवाणधरःकामोरतिमेयासुम ध्मः॥ आनाठ
नंदनं रागीरूपवान्विश्वमोहक इति ब्रैह्ममेरु संनिधानात् धान्यांतरा तु प्रदेशाच्चमंदरोपि त्रीहिमय इति म
दना॥ तत्र विष्कंभपर्वतं चैवयवैः कुर्यात्तु पूर्वत इति ब्र॰ स्कांडोक्तेः॥ गणौरितिनराकृतिभिस्त्रिभिर्गणैर्यु
क्तं कपिजलवत् का न केति कानकनिर्मितोनकंदरः तद्रूपं प्रयोगेझेया॥ क्षीरेति क्षीरपूर्णेनिरौप्येण॥ अरुणोद
राख्येन सरसारौप्येणवनेन च विराजमानं॥ याम्येन गंधमादनश्च निवेशनीयो गोधूमसंचयमा॥ कलधौतजं
छाहेयेनपद्मयतिना घृतमानसेन वर्णेन राजतवनेन च संयुतःस्यात्॥ कलधौत हैमजंबूवृक्षेण॥ यक्ष
पतिनासघृतमानससरसाहेमेन राजतवनेनवस्त्रैश्च संयुत॥ पश्चात्तिलाचलमनेकसुवर्णपुष्पसौवर्णपि
प्पलहिरण्मयहंससयुक्तं॥ आकारयेद्रजतपुष्पमयेन तद्वद्वस्त्रान्वितं दधितो दसरस्तु दद्यौ॥ आकारयेत् कुर्या
त्॥ दधाति सद्दधिराजतं पात्रं सितोदारव्यं सरः॥ संस्थाप्य तं विपुलशैलमथोत्तरेण शैलं सुपार्श्वममपिमाषमयं

दानम०

॥१३८॥ सवस्त्रं पुष्पैश्च हेमवत्पादपशोरवरं तमाकारयेत्कनकाधेनुं विराजमानं। माक्षिकमद्रुसरसाचवने नत द्वौ
प्येण गास्करवतावपुत विधाय संस्थाप्येति द्वौ लंतं पूर्वोक्ते तिलान वारकं न्न घेत्यादिः पुनः पार्श्वविधिः। मा
त्सीति सम धरूप्य मात्रमात्र रूपन्ना। पारय मरस्मेत्पर्युः देमचतुर्भिरथ वेदपुराणविद्भिर्दानेरनियचरिते
कृतिभिर्द्विजै दे। पूर्वेण हस्तमित मन्त्र विधायकुंडं कार्यं तिलैर्यव घृतेन समिक्षुशौभ्व ब्रह्मांडे। इंद्राद्या लोक
पालाश्चतेषो होमो विधीयते। तल्लिंगैश्चैव मंत्रैश्च समिद्भिरथ वाजितिलैः। पौरुषेण तु सूक्तेन ब्रह्मादीनां वि
धीयते। तथा व्याहृतिभिर्होमस्तिलै राज्येन चैव हि। अष्टशतं तु होतव्यं सर्वकामसमृद्धये इति। वसुरुद्रादित्य
मरुद्वायर्क्कोलोकपालाश्चेति चकारः। यत्रादिकामे धेन्वं तानाम शांतिदेवतानां तिलयवघृतैौडुंवरसमि
त्कुशैः। पंचविंशैर्यैः पृथक् त्रयोदशसंख्यया होम इति पंचाशाधिक सहस्रं सर्वाग्न्याहुतय इति दानविवेके
तन्न। तिलैर्यव घृतेन समित्कुशैरिति लैर्यव घृतेन समित्कुशैरिति पृथक्समस्तयोश्चतृतीयया साधनत्वं वै
षम्यात्समित्कुशैरिति द्वंद्वारे पेक्षयाकर्मधारयस्यलघुत्वात्। ब्रह्मांड वधो विरोधात् त्रिपंचाशदधिक सहस्रसं

रामः ॥१३८॥

ख्यायाः। दृश्यपत्रिशत्याः कथमपसंगतेश्च समित्कुशाः इति कर्मधारयः। तेन तिलानां पृथक् साधनता यव
घृतयोर्व्यासक्तः समस्तयोस्तृतीयाश्रुतिः। कुशानां तु पृथगिति त्रयेण्येव होमसाधनानि तैः। प्रत्येकमष्टसं
ख्यया यत्रादिक्षात्रिंशद्देवताकृत्वेंद्रादिदशलोकपालेभ्यो ष्टवसुभ्य एकादशरुद्रेभ्यो द्वादशादित्येभ्यश्चति
लैः समिद्भिर्वा प्रत्येकमष्टसंख्यया कृत्वा सूर्यकामदेवधनदहंसकामधेनुभ्य समस्तव्याहृतिभिस्तिलैराज्ये
न च कुर्यात्। अष्टोत्तरशतं तत्र चतुः पंचाशत्तिलैः। चतुःपंचाशदाज्येन रात्रौ च जागरमनुद्धतगीततुर्येरा वाह
नं च कथयाभिशिलोच्चपानं। संत्रावद्ध्यंते। एवमामंत्र तान्सर्वानप्रणा तेविसर्जेपुनस्तात्वायगुरवे दद्या
न्मध्यमं पर्वपर्वतो तम। विप्र्कंजपर्वतानु द्याहत्विग्भ्यः क्रमशो बुधः। गाश्च दद्याच्चतुर्विंशदथवा दशपापि व
।त्तक्तितः सप्तवाष्टौवा पंचदद्याद्दशक्तिमान्। एकां वा गुरवे दद्यात्कपिलां च पयस्विनी। इति स्मो दक्षिणां द द्या
द्यथासंभवविकांचनं। पर्वतानामशेषाणामेषएव विधिःस्मृतः। तएवपूजने मंत्रास्तएवोपस्कराःस्मृताः। ग्रहा
नां लोकपालानां ब्रह्मादीनां च सर्वशः स्वमंत्रेणैव सर्वेषु होमः शैलेषु पद्यते। उपवासी भवेन्नित्यमशक्तौ

दानम०
॥२३९॥

न्तक्रमिष्यते ॥ विधानं सर्वशैलानां क्रमशः शृणु पार्थिव ॥ दानकालेषु ये मंत्राः पर्वतेषु च यत्फलं ॥ मंत्राः प्रयोगेऽज्ञे
याः ॥ त्वमेव च यमोऽस्माकमरत्नमेव जनार्दन ॥ धान्यपर्वतरूपेण पाहि तस्मान्नगोत्तम ॥ अनेन विधिना य-
स्तु दद्याद्धान्यमयं गिरिं ॥ मन्वंतरशतं साग्रं ब्रह्मलोके महीयते ॥ अप्सरोगणगंधर्वैराकीर्णेन विराजित ॥ विमाने
न दिवः पृष्टमायाति सुरसेवितः ॥ कर्मक्षयाद्राजराज्यमाप्नोतीह न संशयः ॥ इति धान्यादिशैलदानं ॥ अथ प्रमा
धारण प्रयोगः ॥ यजमानः पूर्वोक्तदेशे षोडशहस्तं मंडपं पूर्ववत् ॥ तस्य च प्राच्यामुदीच्यां वैकामेव द्वारं तोर-
णे च नवचत्वारिंशत्कुंडे चैकमेव प्राच्यामेव हस्तं प्राच्यां च हस्तमात्रामहवेदी ॥ अथ षट्शैलनिर्माणं मध्ये कुर्या-
त्सहस्रद्रोणमितराजशालिनामकमहाव्रीहिभिरुत्तमं तदर्धेन मध्यमं द्रोणशतत्रयेणाधममि-
तिमेकशाल्याकल्पयेत् ॥ द्रोणः परिभाषायामुक्तः ॥ मेरोरुपरि मध्ये कल्पवृक्षं प्रागादिदिक्षु हरिचंदन०
मंदार० संतान० पारिजातक० ॥ अथवाक्षौ मंदारकल्पवृक्षपारिजातावस्थाप्य ॥ शर्करा च लेतु संतानह-
रिचंदनावत्रपकौ पूर्वादिदिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमाः ॥ पक्षिसंघांस्तु निसंघांश्च ॥ तथा प्रागादिक्रतु

रामः
॥६९२॥

ष्वेकमेणमुक्ताफलहीरकैर्गोमेदपुष्परागैर्मरकतनीलैर्वैडूर्यपद्मरागैः ॥ समसंख्याकैर्भूषितं रौप्यशृंगचतुष्कं
तद्बहिर्दिगष्टके रौप्यमिंद्रादिलोकपालप्रतिमाष्टकं ताश्रीखंडैर्लतानां स्थाने प्रवालानि शिलानां मुक्ताः
प्रागादिषु मेघानां श्वेतपीतकर्बुररक्तवस्त्राणि वंशानामिक्षून् जलस्य घृतं गंधपुष्पनानाफलानि च परित
संस्थाप्य पंचवर्णं वितानकं चोपरि धारयेत् ॥ ततो यवैर्मेरोरथ षोडशेन प्राच्यां मंदारं ॥ तदुपरि नरकपंगणत्रयंक-
दंबं च सौवर्णं कदंबमूले हैम ॥ कामदेवः अरुणोदसरस्थ निदुग्धपूर्णं रौप्यपात्रं रौप्यं चैत्ररथाख्यं वनं गंधपु-
ष्पफलवस्त्राणि च स्थापयेत् ॥ याम्ये मेरुषोडशांशेन गोधूममयं गंधमादनं ॥ तदुपरि सौवर्णजंबूवृक्षं तन्मूले सौव-
र्णमुदरकुरवं धनदं मानससरःस्थाने सघृतं रौप्यपात्रं रौप्यं गंधर्वाख्यं वनं नानाफलवस्त्रमाल्यानि च स्थाप-
येत् ॥ पश्चिमे मेरुषोडशांशतिलमयं विपुलं पर्वतं तदुपरि सौवर्णपिप्पलं तन्मूले प्रभुरवं वर्णहंसप्रति-
मा सितोदसरःस्थाने च दधिपूर्णं रौप्यपात्रं रौप्यं वैभ्राजं वनं वस्त्रफलमाल्यानि च स्थापयेत् ॥ उत्तरे मेरुषोडशां-
शमितमाषैः सुपार्श्वपर्वतं तदुपरि सौवर्णवटं तन्मूले दक्षिणामिमुखं सवत्सां सुवर्णधेनुं भद्रसरःस्थाने म

कपूर्णौरोप्य पार्श्वे प्रसावित्रं वनं वस्त्रं फलानि च स्थापयेत्। एवं वक्ष्यमाणपर्वतेष्वपि मेरुद्रव्यचतुर्थांशेन लवणादि
द्रव्येण प्राग्दिशु विष्कंभपर्वता ज्ञेयाः। अथ यजमानो द्येत्यादि उक्त्वा अप्सरोगंधर्वयुतविमानकरणकत्व
त्वलोकिगमनमायनमन्वंतरकालदेवलोकवासोत्तरभूलोकराजत्वकाम ईश्वरप्रीतिकामो वा धा
न्यपर्वतदानमहं करिष्ये इति संकल्प्य गणेशपूजास्वस्तिवाचनमातृपूजानांदीश्राद्धाचार्यत्विग्व
रणतन्तु धुपर्कपूजनमंडपपूजाचार्यनियोगांतं सामान्यप्रयोगोक्तं कुर्यात्। आचार्योपि महादिस्थापना
दिकुंडसमीपस्थितकलशस्थापनांतं कुर्यात्। अथर्त्विजः प्राकुंडे महादिग्रहत्रिंशद्देवताभ्यस्तन्मंत्रैस्तिलैः
पृथक् यवघृताभ्यां मितिताभ्यां कुशे श्येति त्रिभिः साधनैः प्रत्येकमष्टवारं कृत्वा दशलोकपालेभ्यो ष्टव
सुभ्यः एकादशरुद्रेभ्यो द्वादशादित्येभ्यश्च प्रत्येकमष्टसंख्यया समिद्भिस्तिलैर्वा जुहुयुः। मंत्रास्तु सामा-
न्यप्रयोगे उक्ताः। ततः पुरुषसूक्तेन ब्रह्मविष्णुरुद्रेभ्यः समिद्भिस्तिलैर्वा सर्वकामदेव धनदहंस कामधेनुम
स्तिस्रै घृतेन वा ष्टोत्तरशतं जुहुयुः। तत्र चतुःपंचाशत् तिलैः। चतुःपंचाशद्घृतेनेति। ततो यजमानो मेरुमावा



हयेत् पूजयेत्तन्मंत्रः। त्वं सर्वदेवगणधामविधिर्विरुद्धमस्मद्गृहेष्वमरपर्वत नाशयाशु। क्षेमं विधत्स्व कुरु शांति
मनुत्तमां नः संपूजितः परमभक्तिमता मया हि। त्वमेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः। मूर्त्तामूर्त्तं परं बीजम
तः पाहि सनातन। यस्मात्त्वं लोकपालानां विश्वमूर्त्तेश्च मंदिरं। रुद्रादित्यवसूनां च ततः शांतिं प्रयच्छ मे। यस्माद
न्यममरैर्नारीभिश्च शिरस्तव। तस्मान्मामुद्धराशेषदुःखसंसारसागरात्। अथ मंदरस्य। यस्माच्चैत्ररथे
न त्वं भद्राश्वश्च सुखेन च। शोभसे मंदर क्षिप्रमतस्तुष्टिकरो भव। अथ गंधमादनस्य। यस्माच्चूडामणिर्जं
बूद्वीपे त्वं गंधमादन। गंधर्ववनशोभावानतः कीर्तिर्दृढास्तु मे। अथ विपुलस्य। यस्मात्त्वं केतुमालेन वै
भ्राजेन च। हिरण्मयाश्वत्थशिरास्तस्मात्पुष्टिर्दृढास्तु मे। अथ सुपार्श्वस्य। उत्तरैः कुरुभिर्यस्मात्सावित्रेण व
नेन च। सुपार्श्व शोभसे नित्यमतः श्रीरक्षयास्तु मे। ततः सर्वैर्जागरणं कृत्वा स्नानादिकृत्वा कुंडसमीपस्थकलशज
लैर्यजमानमभिषिंचेयुः। ततः कर्त्ता गृहीतकुसुमो मेरुं प्रदक्षिणीकृत्योपतिष्ठेत्। अन्नं ब्रह्म यतः प्रोक्तमन्ने
प्राणाः प्रतिष्ठिताः। अन्नाद्भवंति भूतानि जगदन्नेन वर्त्तते। अन्नमेव परो लक्ष्मीरन्नमेव जनार्दनः। धान्यपर्वत

दानम०

॥ १४२ ॥

रूपेण पाहि तस्मान्नमो नमः इत्थं पठित्वा पुष्पांजलिं प्रक्षिप्य नमस्कृत्य प्राङ्मुख उपविश्योदङ्मुखेभ्यो गुर्वादिभ्यः
क्रमेण गिरीन् दद्यात् तत्प्रयोगस्तु अद्येत्यादिनांते अमुकगोत्रायामुकशर्मणे ध्यायिनेमुकनाम्नेर्गणे गुरवे
च्छरोगंधर्वगुणयुतविमानकरणकस्वर्लोकगमनानंतरसाम्यमन्वंतरस्थातावधिसमपद्देवलोकनिवासोत्त
रभूलोकराजत्वप्राप्तिकामः इमं धान्यमयं सौवर्णमंदरादिशृंगपंचकसौवर्णब्रह्मविष्णुरुद्रार्कप्रतिमायुक्तं
मुक्ताहीरकादिभूषितरौप्यमयमंगच्छकशोभितरूप्यमयेंद्रादिलोकपालप्रतिमरौप्यमयनितंबाच्छि
तमिक्षुवंशाव्रजकंदरं दिक्चतुष्टयस्थापितरौप्यपात्रस्थितघृतोदकपात्रवर्णादिकचतुष्टयस्थापितशुक्ल
पीतकर्बुररक्तवस्त्राबुदधरं नानाफलमाल्यवितानाद्युपकरणसहितं तुभ्यमहं संप्रददे न ममेति तद्वत्ते दद्यात्
सर्वत्र स्वस्तीति प्रतिगृह्य स्वशाखीयां कामस्तुतिं पठेत् ततः कृते तद्दानप्रतिष्ठार्थमिमां गां तुभ्यमहं दक्षिण
त्वेन संप्रददे न ममेति दद्यात् तत्र चतुर्विंशतिपक्षे अष्टौ गावस्तु रवे च तस्य ध्वतत्विक्रत्विग्भ्यः दशपक्षे सर्वेभ्य दानमः
एकैकां एकपक्षे गुरवे एव तां कपिलां ऋत्विग्भ्यः सुवर्णमिति मदनादयः एवं पूर्वस्थितं मंदराख्यविष्कंभगिरिं ॥ ६५४

यवमयं सौवर्णनानाफलनकदंबतन्मूलस्थवर्णकामदेवप्रतिमम् अरुणोदसरः स्थानीयक्षीरपूरितरौ
प्यपात्ररौप्यघटितचैत्ररथवनवस्त्रनानाफलादियुतं तुभ्यमहं द्विज संप्रददे न ममेति दद्यात् इमं दक्षिणस्थित
गोधूममयगंधमादनविष्कंभपर्वतं सौवर्णजंबूवृक्षमूलस्थितसौवर्णकुबेरप्रतिमान्वितं मानससरः स्थानीयघृत
पूरितरौप्यपात्रं रूप्यघटितगंधर्ववनवस्त्रनानाफलमाल्यवितानादियुतं तुभ्यमिति दद्यात् इमं पश्चिमस्थितं
तिलमयं विपुलाख्यं विष्कंभपर्वतं सौवर्णपिप्पलतन्मूलस्थितसौवर्णहंसप्रतिमान्वितं सितोदसरः स्था
नीयदधिपूरितरजतपात्रं रजतघटितवैभ्राजवनवस्त्रनानाफलयुतं तुभ्यमहं संप्रददे इति दद्यात् इममु
त्तरस्थितं माषमयं सुपार्श्वाख्यं विष्कंभपर्वतं हैमवटतन्मूलस्थहैमधेनुप्रतिमायुतं भद्रसरः स्थानीयमधुपू
रितरौप्यपात्रं रौप्यघटितसावित्रवनवस्त्रफलादियुतं तुभ्यमिति दद्यात् लवणाचलादिदानपक्षे प्रयोगे धा
न्यपदस्थाने लवणादिपदं प्रक्षेप्यं तत्तत्फलानि तत्रतत्र वक्ष्यामः आचार्याय धरां तु जयान्येभ्योपि दानुपद्वे
युष्मभ्यमहमन्येभ्यश्च ब्राह्मणेभ्यः संप्रददे इति दद्यात् ततो गृहं वेद्यां यजमानो देवतां संपूज्य नमस्कुर्यात्

गुरुस्तान्विसर्जयेत्तु यजमानस्तु मंडपाद्गृहं प्रतिमादि गुरवे प्रतिपाद्य ब्राह्मणान्भोज्य भूयसीं दक्षिणां दत्वा
यस्य स्मृत्येति प्रमादात्कुर्वतामित्युक्त्वा विष्णुं स्मृत्वा कर्मेश्वरे समर्प्य विप्राशिषो गृहीत्वा सुहृन्मित्रादियुतो भुंजी
तेति ॥ इति धान्यादिमेरुसाधारणप्रयोगः ॥ अथ लवणाचलः ॥ पाद्मे ॥ उत्तमः षोडशद्रोणैः कर्तव्यो लवणाचल
॥ मध्यमः स्यात्तदर्द्धेन चतुर्भिरधमः स्मृतः ॥ वित्तहीनो यथाशक्त्या द्रोणादूर्ध्वं तु कारयेत् ॥ चतुर्थांशेन विष्कंभपर्वता
न्कारयेत्पृथक्पृथक् ॥ अत्र पृथग्गिरिष्वेके ॥ प्रत्येकं मेरुद्रव्यचतुर्थांशपरिमितेन लवणेन विष्कंभपर्वतचतुष्कं त्र
यं चन्यायः सर्वविष्कंभपर्वतेषु ज्ञेय इति मदनः ॥ एवं तु चतुर्थांशेनेति विधेयचतुर्थांशगतैकत्वविवक्षयैकस्मै
व चतुर्थांशेन चत्वारोपि विष्कंभाचलाः कार्याः पृथक्त्वं तु गिरिगतमनूद्यते न चतुर्थांशगतं विधीयत इति ॥ विधा
नं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा ॥ तद्वद्धेमतरूंस्तत्र वन्हेः कपालान्निवेशयेत् ॥ सरांसि कामदेवादीस्तद्वदत्रा
त्र निवेदयेत् ॥ यथा देवेषु विश्वात्मा प्रवरश्च जनार्दनः ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ प्रणवः सर्वमं
त्राणां पार्वतीय यथा ॥ तथा रसानां प्रवरः सदैव लवणो मतः ॥ यस्मात्सौभाग्यदायिन्या भ्राता त्वं गुडपर्वत ॥ निवास 

श्चापि पार्वत्यास्तस्मान्मां पाहि सर्वदा ॥ अनेन विधिना यस्तु दद्याद्गुडमयं गिरिं ॥ पूज्यमानः स गंधर्वैर्गौरीलोके म
हीयते ॥ पुनः कल्पशतांते तु सप्तद्वीपाधिपो भवेत् ॥ आयुरारोग्यसंपन्नः शत्रुभिश्चापराजितः ॥ अत्र केचित्प
क्षयोत्तरं गंधर्वपूज्यमानत्वपूर्वककल्पशतावधिगौरीलोकवासानंतरसंपन्नापराजितत्वायुरारोग्यपूर्वकस
प्तद्वीपाधिपतित्वकाम ईश्वरप्रीतिकामो वेति संकल्पे विशेषो मत्सर्वं पूर्ववत् ॥ अथ सुवर्णाचलः ॥ पाद्मे ॥
अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमं ॥ यस्य प्रसादाद्भवनं वैरिंचं याति मानवः ॥ उत्तमः पलसाहस्रेण मध्यमः पं
चभिः शतैः ॥ तदर्द्धेनाधमस्तद्वदल्पवित्तोपि शक्तितः ॥ दद्यादेकपलादूर्ध्वं यथाशक्त्या विमत्सरः ॥ धान्यपर्वत
वत्सर्वं विदध्याद्द्विजसत्तम ॥ विष्कंभशैलांस्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत् ॥ नमस्ते ब्रह्मगर्भाय वै नमः ॥ यस्मादनंतफ
लदस्तस्मात्पाहि शिलोच्चय ॥ यस्मादग्नेरपत्यत्वं यस्मात्तेजो जगत्पते ॥ हेमपर्वतरूपेण तस्मात्पाहि नगोत्तम ॥
अनेन विधिना यस्तु दद्यात्कपर्वतं ॥ स याति परमं ब्रह्मलोकमानंदकाननं ॥ तत्र कल्पशतं तिष्ठेत्ततो याति परां
गतिं ॥ अत्र गुर्वादिभ्यो मेर्वादिदानस्य द्रव्यविषयं बहुत्वे तु तुलापुरुषवद्द्विचतुर्थांशो गुरवे न्यूनं तु तदाश

दानम०

१४३ याऽत्येभ्योपि विशिष्टेभ्यो देयामिति हेमाद्रिः। अत्र सकलपापक्षयोत्तरशतकल्पावधिब्रह्मानंदकारकब्रह्मलो
कभोगानंतरपरमगतिकाम इति दानवाक्यं। अथ तिलाचलः। पाद्मे। उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमो मत
ः। त्रिभिः कनिष्ठो राजेंद्र तिलशैलः प्रकीर्तितः। पूर्ववच्चापरं सर्वं विष्कंभकादिकं। दानमंत्रान्प्रवक्ष्यामि
यथा च मुनिपुंगवाः। यस्मान्मधुवधे विष्णोर्देहस्वेदसमुद्भवाः। तिलाः कुशाश्च माषाश्च तस्माच्छं नो भवत्विह
हव्यकव्येषु यस्माच्च तिलैरेवाभिरक्षणं। भवादुद्धर शैलेंद्र तिलाचल नमोस्तु ते। इत्यामंत्र्य च यो दद्यात्तिला
चलमनुत्तमं। स वैष्णवं पदं याति पुनरावृत्तिदुर्लभं। दीर्घायुष्यमवाप्नोति पुत्रं पौत्रं च मानवः। पितृभि
र्देवगंधर्वैः पूज्यमानो दिवं व्रजेत्। सकलपापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वितानंतरपितृदेवगंधर्वपू
र्वकपूज्यमानत्वपूर्वकद्युलोकगमनसमनंतराक्षयवैष्णवपदप्राप्तिका इति दानवाक्यं। अथ त्रैदेव्यव्रते तिल
पर्वतदानं स्कांदे। पूर्वाह्णे संगमे स्नात्वा शुचिर्भूत्वा समाहितः। सर्वपापविशुद्ध्यर्थं नियमस्थो भवेन्नरः। नि रामः
यममंत्रस्तु। त्रिदैवत्यव्रतं देवा करिष्ये भुक्तिमुक्तिदं। भवंतु संनिधौ मे च त्रयो देवास्त्रयोग्नयः इति। ब्रह्मविष्णु ई(ई

महेशानां सौवर्णपलसंख्यया। त्रिमास्तु प्रकर्तव्याः तदर्धेन द्विजोत्तम। सार्धं शतत्रयं द्रोणानां तिलप
र्वते। ब्रह्मविष्णुशिवप्रीत्यै दातव्यं तु गवां त्रयं। हिरण्यभूमिधान्यादिदानं वित्तवसारतः। मध्याह्ने तु ततः स्ना
त्वा शुचिर्भूत्वा समाहितः। तिलपर्वतमध्यस्थं पूजयेद्देवतात्रयं। अथ देवब्रह्मपूजा। नमो विश्वसृजे तुभ्यं सत्या
य परमात्मने। देवाय देवपतये यज्ञानां पतये नमः। ॐ ब्रह्मणे नमः। पादौ। हिरण्यगर्भायेत्यूरूभ्यां। जंघाभ्यां
परमात्मने वेधसे इति गुह्यं पद्मोद्भवाय पापहस्तौ। हंसवाहनाय कटिदेशे रगतानंदाय वक्षसि सावित्रीपतये बा
हू। ऋग्वेदाय नमः पूर्ववक्त्रे। यजुर्वेदाय दक्षिणे। सामवेदाय पश्चिमे। अथर्ववेदायोत्तरे। चतुर्वक्त्राय शिर
सि। हंसाय नमः। कपालाय नमः। ततो लोकपालादिपूजनं स्वस्वमंत्रैः। हिरण्यगर्भपुरुषप्रधानाव्यक्तरूपाय
प्रसन्नस्तु सुखो भूत्वा पूजां गृह्ण नमोस्तु ते। अनंताय नमः पादौ। विश्वरूपाय ऊरुभ्यां मुकुंदाय जानुभ्यां गो
विंदाय जंघायां। गुह्ये प्रद्युम्नदेवाय। पद्मनाभाय नाभौ। लंबोदराय उदरे। वक्षसि कौस्तुभवक्षसे। चतुर्भुजा
य बाहू। वदने विश्वतोमुखाय। शतसहस्रशिरसे मौलौ। आदित्यचंद्रनयनं दिग्बाहो दितिसूदन। पूजां

दानम०
॥२४५॥

दत्तं मया भक्त्या गृहाण करुणापरेति ॥ विष्णुप्रार्थना ॥ महेश्वरं महेशानं भक्तो त्रिपुरांतक । जीमूतकेशाय नमो
नमस्ते वृषभध्वजं ॥ ईशानाय नमः पादौ जंघाभ्यां चंद्रशेखरः । जानुभ्यां पशुपतिर्देवं श्रोत्राभ्यां शंकरः स्मृतः ॥
उमाकांताय गुह्ये नाभौ वै नीललोहितः । उदरे कृत्तिकावासा वक्षे नागोपवीतिने ॥ स्कंधे कारे प्रमेयात्मनूतमोलो
कांतकाय च ॥ पूजा दत्तां मया भक्त्या गृहाण वृषभध्वजेति ॥ महेश्वरप्रार्थना ॥ इति पूजाक्रमः प्रोक्तो मंत्रैरेतैः ॥
प्रयत्नतः ॥ आचार्यं च तथा पूजालंकारभूषणैः ॥ हस्तमात्रा कर्णिमापीवं छत्रं कमंडलुं ॥ श्वेतं वस्त्रयुगं देयं ब्र
ह्मणे सर्वमूर्तये ॥ पीतवस्त्रयुगं विष्णो लोहितं शंकरस्य तु ॥ पंचामृते नस्तपनं पूजनं कुसुमैः स्वकैः ॥ कम
लैस्तुलसीपत्रैः बिल्वपत्रैरखंडितैः ॥ तत्कालसंभवैः दिव्यैः पूज्या देवा यथाक्रमं ॥ पश्चाच्छक्त्या प्रकर्त्तव्यं ब्र
तमेतत्सुदुर्लभं ॥ जीवितं प्राणिनामेतद्दनिःसंनिश्चितं यतः ॥ अथ व्रतस्य करणविधानं शृणु सुव्रत ॥ देव
तात्रयमुद्दिश्य शास्त्रदृष्टेन कर्मणा ॥ प्रजापतये विश्वकर्मणे रुद्राय नमो नमः ॥ इत्यनेनैव मंत्रेण वह्निं
संस्थाप्य यत्नतः ॥ ततो ब्रह्मविष्णुशिवानां नाममंत्रेणाष्टोत्तरसहस्रमष्टोत्तरशतं वा तिलहोमः ॥ अथ

राम:
॥२४५॥

होमावसाने तु गां तु दद्यात्पयस्विनीं ॥ हेमशृंगीं रौप्यखुरीं घंटाभरणभूषणां ॥ ताम्रपृष्ठीं रौप्यखुरीं सर्वोपस्क
रसंयुतां ॥ सदक्षिणां प्रयत्नेन ब्राह्मणाय निवेदयेत् ॥ तेन दत्तं कृतं जप्तं मिष्टं यज्ञैः सहस्रधा कृतं कृत्यो
न वै द्विपावृतस्पाशस्य भावतः ॥ इत्यर्धोदयव्रते तिलाद्रौ चलदानं ॥ अथ कार्पासाचलः ॥ पाद्मे ॥ कार्पास
पर्वतस्तद्वद्विंशद्भारैरिहोदितः ॥ दशभिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः ॥ भारेणाल्पधनो दद्याद्वि
त्तशाठ्यविवर्जितः ॥ धान्यपर्वतवत्सर्वमासाद्य मुनिसत्तम ॥ प्रभातायां तु शर्वर्यां दद्यादिदमुदीरये
त् ॥ त्वमेवावरणं यस्माल्लोकानामिह सर्वदा ॥ कार्पासाचल तस्मात्त्वमघौघध्वंसनो भव ॥ एवं कार्पास
मेरुं यो दद्यात्सर्वसंनिधौ रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह ॥ सकलपापक्षयपूर्वककल्पाव
धिरुद्रलोकनिवासानंतरभूलोकराजत्वकामः इति दानवाक्यं ॥ अथ घृताचलः ॥ पाद्मे ॥ अथातः संप्रव
क्ष्यामि घृताचलमनुत्तमं ॥ तेजोमयमिदं दिव्यं महापातकनाशनं ॥ विंशत्या घृतकुंभानामुत्तमः स्याद्घृ
ताचलः ॥ मध्यमस्तु तदर्द्धेन तदर्द्धेनाधमः स्मृतः ॥ अल्पवित्तः प्रकुर्वीत द्वाभ्यामिह विधानतः ॥ कुंभ.प

दानम:
१४५ लमहस्त्रात्मकंपरिमाणविशेषः विष्कंभपर्वतांतद्वद्वतुर्भागेनकल्पयेत् ॥ शालितंडुलपात्राणिकुंभोपरिनिवे
दयेत् ॥ अत्रतुकुंभःपात्ररूपएव मधुप्रायोघृतस्यद्रवत्वेनधारणयोग्यपरिमाणः ॥ तदुपरिचितंडुलपात्रं
एवविकुंभाचलाष्टपिणतदभिप्रायेणैवपात्राणीति बहुवचनं ॥ कारयेत्संहतान्सर्वान्यथाशोभितवधानत
॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः ॥ धान्यपर्वतवच्छेषंविधानमिहपद्यते ॥ अधिवासंचकुर्वीत
तद्वद्धोमंसुरार्चनं ॥ प्रभातायांतुशर्वर्यांगुरवेविनिवेदयेत् ॥ घृताचलमितिशेषः ॥ विष्कंभपर्वतांस्तद्व
द्विन्यस्यशांतमानसः ॥ संयोगात्घृतमुत्पन्नंयस्मादमृततेजसः ॥ तस्माद्घृतार्चिर्विश्वात्माप्रीयतमत्र
शंकरः ॥ यस्मात्तेजोमयंब्रह्मघृतेतच्चप्रतिष्ठितं ॥ घृतपर्वतरूपेणतस्मात्त्वंपाहिभूधरः ॥ अनेनविधिना
दद्यात्घृताचलमनुत्तमं ॥ महापातकमुक्तोपिलोकमायानिशाकरं ॥ हंससारसयुक्तेनकिंकिणीजा
लमालिना ॥ विमानेनार्कवर्णेनसिद्धविद्याधरार्चितः ॥ विचरेत्पितृभिःसार्द्धंयावदाभूतसंप्लवं ॥
अत्रसकलपातकनाशनपूर्वकंहंससारसयुक्तकिंकिणीजालमाल्यर्कवर्णविमानकरलोकग रामः
१४५

मनपूर्वकसिद्धविद्याधरार्चितत्वविशिष्टपितृसहितभूतसंप्लवावधिकविचरणकामइतिदानवाक्यं
॥ अथरत्नाचलः ॥ मात्स्ये ॥ अथातःसंप्रवक्ष्यामिरत्नाचलमनुत्तमं ॥ मुक्ताफलसहस्रेणपर्वतःस्यादिहोत्तमः ॥
मध्यमःपंचविंशतिस्त्रिंशतिस्त्रिंशतानाधमःस्मृतः ॥ चतुर्थांशेनविष्कंभपर्वताःस्युःसमंततः ॥ पूर्वेणवज्रगो
मेदैर्दक्षिणेनेंद्रनीलकैः ॥ वज्रगोमेदैरित्यनंतरंमंदरइतिशेषः ॥ पद्मरागयुतैःकार्योविद्वद्भिर्गंधमादन
ः ॥ वैडूर्यविद्रुमैःपश्चात्संमिश्रोविपुलाचलः ॥ पद्मरागैःसमैःपर्णैरुत्तरेणतुविन्यसेत् ॥ सुपार्श्वमितिशेषः ॥
वज्रगोमेदैःसमसंख्यैः ॥ समस्पार्श्वकत्वादितिन्यायात् ॥ एवमुत्तरत्रापिज्ञेयं ॥ धान्यपर्वतवच्छेषमत्रापिप
रिकल्पयेत् ॥ तद्वदावाहनंकुर्याद्वृक्षान्देवांश्चकांचनान् ॥ पूजयेत्पुष्पमानाद्यैःप्रभातेचविसर्जनं ॥ दानांत
रमितिशेषः ॥ पूर्ववद्गुरुऋत्विग्भ्यःइमान्मंत्रानुदीरयेत् ॥ गुरुऋत्विग्भ्योदानायेतिशेषः ॥ यदेवगणाःसर्वेरत्ने
ष्वेवव्यवस्थिताः ॥ त्वंचरत्नमयोनित्यमतःपाहिमहाचल ॥ यस्माद्रत्नप्रसादेनतुष्टिंप्रकुरुतेहरिः ॥ मह्वार
लप्रसादेनतस्मात्पाहिसर्वतः ॥ अत्रविसर्जनादीनांमुक्तमोक्षावपिधान्यपर्वतवदतिदेशिकःक्रमोत्रे

दानम०
॥१४६॥

य॥ अनेनविधिनायस्तुदद्यात्कलमहागिरिं॥ सयातिवैष्णवंलोकममरेश्वरपूजितः॥ यावत्कल्पशतंसाग्रंवसे
दिहनराधिपाःपारोग्यगुणोपेतः॥ सप्तद्वीपाधिपोभवेत्॥ ब्रह्महत्यादिकंयत्सारिहवामुत्रवाकृतं॥ तत्सर्वं
नाशमयातिगिरिर्वज्रहतोयथा॥ अत्रानेकजन्मकृतब्रह्महत्यादिपापक्षयोत्तरममरेश्वरपूजितत्वपूर्वक
साग्रकल्पशतावधिविष्णुलोकनिवासानंतरा — पारोग्यगुणोपेतसप्त॥ द्वीपाधिपत्यकामइतिदानवा
क्यं॥ अथरौप्याचलः॥ पाद्मे दशभिःपलसाहस्रैरुत्तमोराजताचलः॥ पंचभिर्मध्यमःप्रोक्तस्तदर्द्धेनाध
रःस्मृतः॥ अशक्तोविंशतेरूर्द्धंकारयेच्छक्तितःसदा॥ विष्कंभपर्वतास्तत्रतुरीयांशेनकल्पयेत्॥ पूर्ववद्राज
तान्कुर्यान्मंदरादीन्विधानतः॥ कलधौतमयांस्तद्वल्लोकेशानर्चयेद्बुधः॥ कलधौतंकांचनंब्रह्मविष्णुशि
वान्कुर्यान्नितंबोत्रहिरण्मयः॥ राजतंस्याद्यदन्येषांकांचनंस्यात्तदत्रवै॥ शेषंचपूर्ववत्कुर्याद्धोमजा
ग — णादिकं॥ दद्यात्तद्वत्स्रजातेनुगुरवेरौप्यपर्वतं॥ विष्कंभशैलान्कृत्विग्भ्यः पूज्यवस्त्रविभूषणैः॥ इमं
मंत्रंपठन्दद्याद्दर्भपाणिर्विमत्सरः॥ पितृणांवल्लभंयस्माद्धर्मेन्द्रोःशंकरस्यतु॥ रजतंपाहितस्मान्नःशोक

राम:
॥६९९॥

संसारसागरात्॥ इत्थंनिवेद्ययोदद्याद्रजताचलमुत्तमं॥ गवांदशसहस्रस्यफलंप्राप्नोतिमानवः॥ सोमलोकेस
गंधर्वैःकिन्नराप्सरसोगणैः॥ पूज्यमानोवसेद्धीमान्यावदाभूतसंप्लवं॥ अत्रसकलपापक्षयदशसहस्र
गोदानफलावाप्तिपूर्वकगंधर्वकिन्नराप्सरोगणपूज्यमानत्वविशिष्टयावदाभूतसंप्लवसोमलोकनिवास
कामइतिदानवाक्यं॥ अथशर्कराचलः॥ पाद्मे॥ अथातःसंप्रवक्ष्यामिशर्कराचलमुत्तमं॥ यस्यप्रसादाद्विष्व
करुद्रास्तुष्यंतिसर्वदा॥ अष्टभिःशर्कराभारैरुत्तमःस्यान्महाचलः॥ चतुर्भिर्मध्यमस्तद्वदर्द्धाराभ्यामधरःस्मृत
ः॥ भारेणार्द्धभारेणकुर्याद्यःस्वल्पवित्तवान्॥ विष्कंभपर्वतान्कुर्यात्तुरीयांशेनमानवः॥ धान्यपर्वतवत्सर्वमा
साद्यमरसंयुतं॥ मेरोरुपरितद्वच्चस्थाप्यंहेमतरुत्रयं॥ मंदारपारिजातश्चतृतीयःकल्पपादपः॥ एतद्वृक्षत्रयंमू
र्द्धिसर्वेष्वपिनिवेशयेत्॥ हरिचंदनसंतानौपूर्वपश्चिमभागयोः॥ निवेश्यौसर्वशैलेषुनिवेशाच्छर्कराचले॥ मंदरे
कामदेवस्तुप्रत्यग्वक्त्रःसदाभवेत्॥ गंधमादनश्रृंगेच धनदःस्यादुदङ्मुखः॥ प्राङ्मुखोवेदमूर्तिश्चहंसःस्याद्वि
पुलाचले॥ हैमासुपार्श्वेसुरभिर्दक्षिणाभिमुखीभवेत्॥ धान्यपर्वतवत्सर्वमावाहनमखादिकं॥ कृत्वाथगु

रवेदयान्मध्यसंस्थं पर्वतोत्तमं। कृत्विममस्तुतुरः शैलानिमान्मंत्रानुदारयेत्। आरोग्यामृतसारोयं परमः शर्क
राचलः। तन्ममानंदकारी त्वं भव शैलेंद्र सर्वदा। अमृतं पिबतां ये तु निपेतुर्भुवि सीकराः। देवानां तत्समुत्थो
यं पाहि नः शर्कराचल। मनोभवधनुर्मध्यादुद्भूता शर्करा यतः। तन्मयोसि महाशैल पाहि संसारसागरात्।
यो दद्याच्छर्कराशैलमनेन विधिना नरः। सर्वपापविनिर्मुक्तः प्रयाति शिवमंदिरं। चंद्रादित्यप्रतीकाशमरुह्या
तुजाविधिः। स हेमयानेनातिष्ठेत्ततो विष्णुपुरं व्रजेत्। ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत्। आयुरारोग्य
संपन्नो यावज्जन्मायुतत्रयं। भोजनं शक्तितः कुर्यात्सर्वशैलेष्वमत्सरः। सर्वत्राक्षारलवणमश्नीयात्तदनुज्ञया
भोजनं ब्राह्मणानां तु सर्वत्र सर्वशैलेषु। दानात्पूर्वे घुः कृतोपवासो दानानंतरं तु वा घृतेनुज्ञया क्षारलवणम
श्नीयादित्यर्थः। सर्वेषां परस्करान्सर्वान्श्रापयेद्ब्राह्मणालयं। पठेद्यो दिमानस्य धनोपि भक्त्यास्मरेन्मनुष्यैरपि दीय
मानं। शृणोति भक्त्या परमतिकरोति निष्कल्मषः सोपि दिवं प्रयाति। दुःस्वप्नं प्रशममुपैति पद्यमाने शैलेंद्रे भव
यभेदने मनुष्यः। यः कुर्यात्किमु मुनिपुंगवेह सम्यक्सन्नात्मा सकलगिरींद्रसंप्रदानं। सन्नात्मा प्रसन्नचित्तः।



॥ अत्र सकलइति सयानं कल्पशतावधिकविष्णुलोकनिवासानंतरसप्तद्वीपाधिपत्योत्तरजन्मायुतत्रयाव
च्छिन्नायुरारोग्यकाम इति दानवाक्यं। अथ त्रिशिखरदानं। विष्णुधर्मोत्तरे। शृणु राजन्प्रवक्ष्यामि शिखराणां
यथाक्रमं। दानं देयं यथा येन तच्छृणुष्व सनातनं। माघशुक्लतृतीयायां मार्गशीर्षस्य वा पुनः। तृतीयायां वैशाखे शु
क्लायां रोहिणीयुता। ज्यैष्ठपक्षांततीयायां विशेषेण तु भार्गव। गुडेक्षुवस्त्रलवणधान्यकाजाजिशर्करा। खर्जू
रतंडुलजाद्राक्षाः दैमल्लयजेन घाफलैर्मनोहरैरम्यैः शिखराणि प्रदापयेत्। तेषामन्यतमं द्यो द्यथाश्रद्धं वि
धानतः। स्थाप्य प्राकारं कुर्वीत प्रादेशाभ्यधिकं बुधः। भुवि गोमयलिप्तायां इक्षुभिः पत्राणि संस्तरेत्। कुर्वीत
शिखरे गौरीस्थानमनुत्तमं। द्विहस्तमग्रं कुर्वीत हस्तमात्रं शिरस्तथा। भित्तिरिक्षुदंडैः कर्या वेष्टयेद्रक्तवा
ससा। दानद्रव्येण तन्मध्ये पूरयेत्कुरुनंदन। इक्षुयंत्रकटे गौरीं तस्योपरि निवेशयेत्। चतुर्भुजां हेममयीं स्व
जयेत्कुंकुमेन तु। गौरीलक्षणसंयुक्तं देवीपुराणे गौरीं शंखेंदुवर्णाभां शार्वरीं च निषेवतां। वृत्तपद्मास
नासीनां साक्षसूत्रकमंडलुं। वरदा घटपात्रा सर्वमाल्यफलप्रिया। वरदा घृता मितिवरदामित्यर्थः। वेष्टयेत्

दानम०

१४८

स्रवस्त्रेण देवीं शिखरानभिमंत्रयेत्॥ यस्मान्निवासः पार्वत्याः शिखरस्त्वं सुरैर्वृतः॥ तस्मान्मां पाहि नगवर॥
त्वं गौरीशिखरः सदा॥ एवमामंत्र्य शिखरं तत्तृतीयायां तदर्यतः ततः स्नात्वा प्रभाते तु दद्यान्मंत्रेण मंत्रितः॥ य-
स्मात्त्वं सर्वभूतानां उपरिष्टादवस्थितः तस्माच्छिवः प्रीयतां मे तव दानेन सर्वदा॥ अर्द्धभागं चतुर्थं वा पंचमं
वापि वै गुरोः। दद्यात् षष्ठं तु वै ध्रुवं शिष्याणां स्वजनस्य च। अनुजीवीनां च भृत्यानां दुर्गतानां च धीमत॥ एवं द-
त्वा तु शिखरं गौर्या भुंजीत वाग्यतः॥ समुक्तकेशाः संप्राप्य शरीरं घृतमथापि वा॥ विधिनानेन यो दद्याद्गौर्याः
॥ शिखरमुत्तमं स वसेद्भुवने देव्याः कल्पकोटिशतत्रयं॥ पुण्यक्षयादिहायातो जायते पृथिवीपतिः॥ अनेनैव
विधिना देयं विधिहीनं न कारयेत्॥ विधिहीनकृतं सर्वं तत्र दातुः फलं भवेत्॥ अथ प्रयोगः॥ यजमानो मा-
घशुक्लतृतीयायां शुक्लकाले पूर्वाह्णे गणेशपूजा स्वस्तिवाचन मातृकावसोर्द्धारा पूजा नांदीश्राद्धानि करि-
ष्यमाणः शिखरदानांगतया करिष्य इति संकल्प्य तानि कृत्वा मासपक्षाद्युल्लेखादौर्भाग्यदौर्गत्याभावपूर्व- रामः
ककल्पकोटिशतत्रयावच्छिन्नगौरीभवननिवासानंतरपृथिवीपतित्वकामः॥ अमुकशिखरदानमहं ॥७०१॥

करिष्य इति संकल्प्याचार्यं वृत्वा संपूज्य शालिशायां भूमौ विस्तृतयत्नाणि संस्तीर्य मध्ये द्विहस्तविस्तारं उपरि हस्त-
मात्रविस्तारं चतुरस्रं स्वशरीरार्द्धप्रमाणतः प्रादेशाधिकमुच्चमिक्षुदंडमयं कृत्वा तदग्रं नवरक्त-
वस्त्रेण वेष्टयित्वा गुडादिदेयद्रव्येणापूर्योपरि सुयत्नक-मास्तीर्य तत्र हैमां दिव्यवस्त्रपरिवृतां देवीं वर्णनां च-
न्द्रमौलिपद्मासनामक्षसूत्रकमंडलुधरवराभयकरां गौरीं हैमीं सशिखरां सूक्ष्मवस्त्रेण वेष्ट्य कुंकुमादिना
संपूज्य भवान्यै नमः पार्वत्यै नमः शंकरप्रियायै नमः कामदेव्यै नमः जगद्धितायै नमः नानाभिः ध्यानदायै इदं यंत्रं दायै स्तनौ सुभद्रायै
मुखं ललितायै शिरः संपूज्य पुष्पांजलिमादाय शिखरं त्रिः प्रदक्षिणीकृत्वा यस्मान्निवासः पार्वत्याः शिखरस्त्वं सु-
रैर्वृतः। तस्मान्मां पाहि नगवर त्वं गौरीशिखरः॥ सदेत्यनुमंत्र्य पुष्पांजलिं प्रक्षिप्य नमस्कृत्य जागरणं कुर्यात्। त-
तः प्रभाते कृतनित्यक्रियः शिखरस्य पश्चिमभागे उपविश्य मासपक्षाद्युल्लेखामुकगोत्रायामुकवेदायामुकश-
ाखाध्यायिने अमुकशर्मणे ब्राह्मणाय दौर्गत्याभावपूर्वककल्पकोटिशतत्रयावच्छिन्नगौरीभवननिवासानंतर-
पृथिवीपतित्वकामो हेतु ममनेन्न्यश्चविधेम्य इदं शिखरं गौरीप्रतिमायुतं संप्रददे न ममेति दत्वा सुवर्णदक्षि-

दानम.

णं च दत्वा विप्रायं सोऽप्यत द्दिने स्वयं क्षीरं घृतं वा वाप्यतो मुक्तकेशः॥ प्राप्नोयात् स्वस्तु वस्त्रादि शिखरदानेन तु तद्द्ये
॥१४९॥ कुम्भ पूरणं संकल्प्य वा कार्यादो चत त्तत्स्यदप्रयोग इति शेषः॥ अन्यत्तुल्यं॥ इति गुडादि शिखरदानप्रयोगः॥ अथ पर्व
दनिधिदानं॥ वह्निपुराणे॥ सुरूपां तिथिं प्राप्य तु पौर्णमासीं तथोपरागे शशिसूर्ययोर्वा॥ चतुर्युगादिद्वि
यत इषे वाप्यवीधने तस्त्वयने च विष्णोः॥ कुर्याद्यो हि हेमवरमेकं कुंभं हिरण्यमानेन यथात्मशक्त्या हिरण्य
मानेनांतः प्रक्षेप्य नाराहिमितस्तु चूर्णरत्नादिना याकं तःपूर्णः स्यादित्यर्थः॥ तथा विधामं चमुराजतस्यां द्विर
ण्यनाटेण तु प्रयेनत्॥ तदर्द्ध तो द्वैनेन हैतो वास्व शक्तितः स्वर्णेप द्यैःग्राते नतदर्द्धमर्द्धं नतु वित्तशाठ्यापलत्रय
धर्ममपि प्रकुर्यात्तत्ताम्रांडकेन कंनिधाय सवज्रनीलोत्पलपद्मरागं समुक्तं द्रवैर्यसविद्रुमं च तद्राजतया
न्नमधो मुखं स्यात् तद्राजनं पूर्वोक्तं पिधानयात्रं एवं तु नं मृद निविस विदारय कृत्वा सने ग्रावरणे प्रयुक्ते प्राव
रणामुत्तरछक्ते नोपयुक्तो सहिते कुशोत्तरं दर्प्य एकमरा चंस पादुके पात्व दछत्रयुक्तं॥ तत्क्षौमवस्त्रोत्तम
युक्तं सपूजयेन्मंत्रवरैरथैतैः॥ आदौ तु पंचामृतमाप्य विष्णुं संस्नाप्य संसारदरं समर्प्य तथेश्वरं यावकमेव राम:
॥७०२॥

ऊत्वो श्रामन्त्र पेद — तिधिततस्तं श्रीखंडकर्पूरसकुंकुमेन पंचामृतं नामभिश्च याप्रलिख्य नमस्त थोकारयु
त च पात्रेत राजते थे चययार्चयेथा चैत्तं॥ मित्रः प्रयोगो वस्यते॥ एवं पूज्य विधाने ततो विप्रमथार्चयंत कि
रीटांगद निष्का मंकुंडलांगुलि भूषणैः अलंकृत्य हरिं पदीपातां वरधर ऽतत॥ पूजयेदच्युतं ध्यात्वा मं
त्रेयां ण्यन्येन नक्तिमा शमं त्रः प्रयोगे व क्षतेएवं — पूज्य हरिं ध्यात्वा तं द्विजं विष्णुरूपिणं ततो मृदनिधिं दद्या
न्नामत्रेणानेन मानवः स्वगोत्रोच्चारणो नादौ विष्णोर्नाम महात्मनः॥ व्यवदन्नेति लेः सार्द्ध उदकं संपरित्यजे
त् पितृमंतारणार्थाय जित्वातं दविष्ट ज्रये सर्वाघौघ विनाशाय विष्णोर्दानंमपाकृतं॥ तदनेन सरत्नेन धा
तुन्नयुतेन च सद्ग्रो मांवरयुक्तेन सादर्शपादुके मच॥ सासनेनसछत्रेण चामरोपानदेन च महादानं द्रविधा
नेन प्रयता विष्णुरीश्वरः॥ एवमुच्चार्य तं दद्याद्द्विजाय हरिरूपिणे॥ गोप्येन विधिना दद्याद्धेमसंख्यां न कीर्त्तयेत्॥ प्र
कीर्त्तिते को टिगुतं फलं प्रगोपिते कस्यगणोर्नसंख्या॥ इतीदमाख्यायन कीर्त्तयेत्तु धीर्निधानमधे निदितं च
यश्चेत्॥ एवं कृते स्यान्मनुजः कृतात्मा न वेन्न चस्यान्मकदाचित्॥ प्रयाति विष्णो॥ पदमव्ययं तत्तत्रि वात्म

दानम० कानंदमयंममाज्ञात्॥ इति नवनिधिदानं॥ अथ प्रयोगः॥ पूर्वोक्ते काले यजमानस्तिथ्याद्युल्लिख्य सकलपाप
॥१५०॥ क्षयसर्वपितृतारणानंदविवृद्धिशिवात्मकानंदमयाव्ययविष्णुपदप्राप्तिकामो नवनिधिदानमहं करि
ष्य इति संकल्प्य नवनिधिं क्षौमवस्त्रद्वयावृतं स्थापयित्वा परितो दर्पणचामरपादुकोपानहछत्राणि चासा
द्य पुरतो हरिहरौ स्थापयित्वा संपूज्य प्रागुत्तरे देशे स्वगृह्यानुसारेणाग्निस्थापनादिकर्म कृत्वाहुताकृति जैर
ष्टोत्तरशतानि संख्यया कृत्वा आरंभ ॐ कुंकुमकर्पूरैः त्रणवादि श्रियै नमः इति पंचाक्षरमंत्रं निधिकेभ्नेनिधा
नेच लिखित्वा तेनैव नवनिधिमुपचारैः संपूज्य गृहीतकुंकुमांजलिर्नवनिधिं प्रदक्षिणीकृत्य त्वया समस्ताम
रसिद्धयक्षविद्याधरोरगकिंनरश्च गंधर्वविद्याधरदानवैर्दैत्यैर्युतं हृतं विश्वमिदं नमस्ते मम यत्संसारकरी त्वमेव
विभो सदानंदमयी समस्तकल्याणवयः समाधिहरिप्रिये नवनिधे नमस्ते इत्युपस्थाय पुष्पांजलिं प्रक्षिप्य न
मस्कृत्योदङ्मुखमाचार्यं किरीटांगदनिष्कांबुकुंडलांगुलीयभूषणपीतवासश्चंदनादिभिः संपूज्य विष्णुरूपिणं रामः
ध्यात्वा कुसुमपाणिः देवोसि विभो नित्यं नित्यानंदमयोदरे हर मे दुष्कृतं कर्म कृपाकर नमोस्तु ते॥ देव भगव ॥७०३॥

ज्म्नवनंगकरेश्वर॥ नवनीतिकरो जिष्णो प्रजविष्णो नमोस्तु त इति॥ पुष्पांजलिनाभ्यर्च्य कुशाक्षततिलयवज
लान्यादायाद्यामुकशर्माहं सर्वपापक्षयसकलपितृसंतारणनित्यानंदविवृद्धिशिवात्मकानंदमयाव्ययवि
ष्णुपदप्राप्तिकामोमुकगोत्रायामुकशर्मणेमुकशाखाध्यायिने इमं नवनिधिं सरत्नधातुनवा
त्मकं सक्षौमांबरयुग्ममादर्शपादुकोपानछत्रासनोपकरणसहितं विष्णुरूपिणे तुभ्यं संप्रददे न ममेति द
द्यात्॥ ततः सुवर्णदक्षिणां दत्वा विप्रेभ्यो भूयसीं दक्षिणां दत्वा यस्य स्मृत्या प्रमादात्कुर्वतां कर्मेत्युक्त्वा
कर्मेश्वरार्पणं कुर्यादिति नवनिधिदानप्रयोगः॥ अथ पानंदनिधिदानं वह्निपुराणे॥ भगवद्वचो गरुडं प्रति
तस्मान्निधानं शृणु सर्वदानतः प्रभावदं नित्यफलप्रदं च॥ ऐश्वर्यदं मोक्षदमक्षयं यत्क्रतुत्रयोद्भूतमनेक
रत्नं कारयेत्कार्तिके वा माघे वा माधवे पि वा॥ अयने विषुवे वापि मन्वादिषु युगादिषु॥ चंद्रसूर्योपरागे च स्व
शक्तौ डुंबरं घटं॥ औडुंबरं ताम्रमयं पिधाने राजतं तथा॥ ब्रह्मध्येयस्वर्णानुसृजेत्॥ सुवर्णमेव सौवर्णे नानारत्न
वरापूर्णं नानानानाभिरावृतं हैमराजतताम्रोत्थैः सरित्कैरभिपूरितं॥ रिक्तैरिति॥ नानानानानाद्यताहृद्धं मधु

तादर्पि शङ्कितः। एकं नानापदं बहुप्रकारवाचि। परं महाराष्ट्रप्रसिद्धनाणकवाचि॥ द्वात्रिंशत्पलसहस्रेण शु
तेनार्द्धेन वा। तदर्द्धार्द्धेन वा राजन् पलानां तु न कारयेत्। कार्यो नन्दिस्तु तस्मै द्वात्रिंशत्काममकुर्वता। उक्तना
णकातिरिक्तं पलाद्यूर्ध्वं पलसहस्रावधित्वाद्याहेमापिञ्छिपेदितिमदनः। राजतेनाथ ताम्रेण घटेन।
नानाधान्योपरिस्थाप्य कल्पोक्तैः स्वर्चयेत्पदैः॥ नानाद्रव्याण्यष्टादशधान्यानि। पदानि मंत्राः। पौराणिकं
नमस्कृत्यस्वयं वा तदनुज्ञया पौराणिको गुरुः। कृतक्रियोग्निसान्निध्ये विष्णोरीशस्य चांडजा॥ इमं समुच्च
रेन्मंत्रं कुशपाणिः प्रसन्नधीः॥ मंत्रः प्रयोगे ज्ञेयः॥ एवं प्रजप्य ध्यानेन नित्यानंदविधिं सुधीः॥ समिद्धार्घ्यकदूर्वा
भिः सकुशाक्षतचंदनैः॥ सिद्धार्थकादिभिरानंदमेवं संपूज्येति योजना तिललाजाः सुसंपूर्णं भूमावुदकमुत्सृ
जेत्। मन्त्रेणानेन विधिवत्कल्पोक्तेन रवगोत्तमः। मंत्रः प्रयोगे ज्ञेयः। एवमुत्सृज्य मुद्रकं विप्रेभ्यः प्रतिपादये
त्। संविभज्य यथाशास्त्रं न कंचिदपमानयेत्। महादानमिदं यस्माद्देकोपि नार्हति। अष्टाष्टपेके चिद्दि
दं तिसमस्तविधिपारगाः। यज्ञदानव्रतानां च साधको र्हति तद्गृहे। एवं यः कुरुते दानं नित्यानंदनिधेः



परं। परं पदमवाप्नोति संसारेस्मिन्निरंतरं। दानानामप्यशेषाणामनंतफलमश्नुते। नित्यानंदविधानस्य प्र
दानादपवर्गभाक्॥ इत्यानंदनिधिदानं। अथ प्रयोगः तत्र यजमानः पूर्वोक्ते काले कुशतिलयवजलाजा
न्यादाय मम कृतदानपक्षे देशकालकीर्त्तनांते निरंतरमहावाप्तिसुकृतदानजन्यानंतफलयोगानंतरा
पवर्गप्राप्तिकाम इति दानवाक्यं॥ अस्मत्कृतदानपक्षे देशकालकीर्त्तनांते वेधः। पद्माधिकरणसकृत्राज्य
करणोत्तरस्वकर्मशेषसंचितत्रेतायुगकालीननिजानुजीविसहिताखिलमहाराजावाप्तिपूर्वकनित्येशा
नपदप्राप्त्युत्तरकल्पावधिकानल्पश्रीकवैद्याधरपदाण्यपलोत्तरोत्तराव्ययवैष्णवपदप्राप्तिदीर्घायुष्टावि
छिन्नसंतानकाम आनंदनिधिमहादानमहं करिष्य इति। कृतसंकल्पः स्वस्तिवाचनमातृपूजनवृद्धिश्राद्धा
चार्यवरणानि कुर्यात्। अत्रानंदनिध्यासादनपूजादि गुरुः कुर्याद्यजमानो वा। तद्यथा। राजतपिधानं ताम्र
घटं कृत्पमानंदनिधिं नानारत्नहेमरूप्यताम्रमुद्रापलाधिकदेमयुतं सद्रुक्मवस्त्रैर्वेष्टितमष्टादशधान्योप
रि विष्ण्वादिदेवतासंनिधौ पयित्वा प्रतिष्ठापूर्वकं उं नित्यानंदनिधये नम इति मंत्रेणाभ्यर्च्य सिधार्थदूर्वाङ्कु

चंदनाक्षतानि आदायानंदनिधिं प्रदक्षिणीकृत्य ॐ नमः सर्वनंदन सर्वसंपद्विवर्द्धन। वर्द्धयास्मान्समृद्ध्येहस्त्या
सुषा यशसा श्रिया। नमस्ते नंतसंतानसदानंदसदोदय। त्वंसुरववैकुरुष्वेह संतत्यामां धनायुषा। नमोन
मः पद्मनिधे धनेशशात्वंकृतो शंकरनैर्ऋतेश। शामंनयास्मद्दुरितं हरप्रज्ञोन मोनमस्ते हर त्वं करेश
न मो नमः पाशधराप्रमेय नमोस्तु वामा यमुनाधेय। नमः समीराय कृताश्रनाय नमोस्त्वनंताय कनाश्र
नाय नमः सुरश्रेष्ठहराश्वराय नमोस्तु सावित्रिशिवेश्रियेन्ति। सरस्वती प्रीतिरतिः क्रियेति सुपुष्टितुष्टिस्मृ
ति शांति कीर्तै सर्वामराणां निधिरप्रमेयस्त्वमेव मंत्रर्षिमुनिश्वराणां। आधारभूतोधिचराचराचरस्य वि
श्वस्य पस्मात्त्राणतोस्मतस्त्वं। नमोस्तु सौदर्यनिधे सुरेशान नमोस्तु गांभीर्यनिधे समुद्र। नमो नमः कांतिनि
धानरुद्रोतेजोनिधे जोत्वां प्रणतोस्मि नानो। नमः पद्माय नंदाय नमस्ते स्वस्तिकाय च। नमः शंखाय मकराय
मणिभद्राय ते नमः। नमोनंदविवर्द्धनाय नंदावर्त्ताय ते नमः नमः कंटककर्णाय कंवावर्त्ताय ते नमः। नमोनंदप्र
प्रतिष्ठाय नमो हेमदंष्ट्राय च। नमो हिरण्यगर्भाय नित्यानंदाय ते नमः। इत्युपस्थाय प्रजयित्वा कुशाति ॥ राम: ॥७०५॥

जलाजयवाक्षतजलान्यादाय अद्येत्याद्युक्त्वाद्येह पुण्यकालेस्मिन्द्विजदेवाग्निसंनिधौ यत्र श्रेयो
भिवृद्ध्यर्थं मातापित्रोरात्मनः। पुराणन्यायमीमांसावेदवादिभ्य एवच नमो विद्याविधायिभ्यो नानागोत्रे
भ्य एव च विप्रेभ्यो नेकशर्मभ्यो नित्यानंदनिधिं परं अहं संप्रददे तेभ्यो नानावृतेन च। सत्सुवर्णरौप्यताम्रेण
सरत्नेन सवाससा। सोपस्करेण पुरुषो ब्रह्मविष्णुशिवात्मकः। प्रीयतां निधिदानेन अपुत्रपुरुषोच्युत॥ इ
तिमंत्रेण दंभमौढिशिष्याविप्रेभ्योमुकगोत्रेभ्योमुकामुकनामभ्योऽमुमौडुवरं रौप्यपिधानसुवर्णव
त्राष्टादशधान्यादियुतमानंदनिधिं निरंतरेत्यादिप्राग्निकमइति सप्तदानपक्षे फलमुक्तं त्रिरव्यासत्वस्व
नपक्षेतुवेधसदेत्यादिसंतानकाम इत्युक्त्वायुग्मभ्योहंसंप्रददे इति दद्यात्। एकस्मै वा दद्यात्। ततः सुवर्णं
दक्षिणां दक्षिणत्वा विप्रान् संभोज्य भूयसीं दक्षिणां दत्वा यस्य स्मृत्येति प्रमादात्तिचोक्त्वा विष्णुं स्मरेत्। इत्यानं
दनिधिदानप्रयोगः। अथ देवतादानानि। तत्रतावद्दशावतारदानं। विश्वामित्रः दानानामुत्तमंदानं हैमं
विष्णोः स्वरूपकं। तस्मात्तु एपार्थिनादेया हैमा विष्णोस्त्वारूपकाः मत्स्यकूर्मौ पवाराहो नरसिंहोपवामनः।

रामो राम श्च तस्माच्च बौद्धकल्की च ते दश ते ति॥ मत्स्यादिस्वरूपाणि विष्णुचक्रदाने दर्शितानि॥ यथा राक्षमाम
ऊर्वीत सुवर्णेन विजानता॥ समेन षोडशेनैव समानस्मेतानि कारयेत्॥ षोडशेनैव समानीति महाभूतघ
टारंभे षोडशो दाने प्रादेशादंगुलशतं यावत्कुर्यात्प्रमाणमुक्तं तत्प्रमाका मत्स्यादिरूपकानि सर्वाणि इत्य
र्थः॥ वित्तानुरूपतो राजन्नतु स्यमाद्यदरिद्रयो॥ संपूज्य नाम भिस्तैस्तु पुष्प धूप निवेदनैः॥ भक्तिनम्रपुराण
मां ते निवेदयेच्छ्रद्धया तत॥ अनूप ब्राह्मणानृराजन्पादौ प्रक्षाल्य पलतः उपवेश्यासने सर्वाश्चंदनाना
नुलेपयेत्॥ सुगंधै कुसुमैश्चैव धूपैर्दीपैस्तथैव च॥ अर्घाद्यैवस्त्रयुग्मैश्च ग्रहरोगैश्च स्पर्शयोः॥ अयने विषु
वे चापि द्वादश्यां तु विशेषतः उपोष्यैकादशीकाये धर्मकार्यं च सर्वशः॥ अन्यथा नरकं याति त्मेव माह पिता
महपितामह॥ शास्त्रका विष्णुरूपी च अर्हयेत विमत्सरः॥ एकैकं देवरूपं तमेकैकस्य समर्पयेत्॥ अथवा
विदुषः सर्वान्दद्यात्संपूज्य मानवः॥ नान्यतेपि कादाचिन्नदद्यात्सारं खंडिने तथा॥ एवं कृत्वा यूर्विप्रस्य हस्ततो
पं क्षिपेत्स्वयं दशावतारतो राजन्विष्णोरैक्यं स गच्छति॥ महापातकसंसर्गान्मुच्यते तत्क्षणाद्भ्र रामः ॥७०६॥

ति॥ अद्येत्यादि॰ महापापसंसर्गत दोषनिवृत्यर्थं विष्णोर्दशावताराणां दीनस्य इति संकल्प्यावताराण् वि
धानसंपूज्य देवरूपं मया विप्रकारितं कांचनं शुभं तद्ब्राह्मणाय दानेन प्रीयतां विश्वरूपिणा॥ इति मंत्रमुक्त्वा दे
शकालाद्युक्त्वामुकगोत्रायामुकशर्मणे मुकरूप महापापसंसर्गज दोषनिवृत्तिकामस्तुभ्यमहं संप्रददे
नममेति॥ एकैकमेकैस्मै दद्यात्॥ एकस्मै वा सर्वाणि॥ दान प्रतिष्ठार्थं सुवर्णं दक्षिणां चेति दशावता
र दान प्रयोगः॥ अथ ब्रह्म विष्णु रुद्र दानं॥ ब्रह्मांडपुराणे॥ शौनकादिभिः पृष्टेन रो महर्षणेन प्रोक्तं एवं तमु
नयः सर्व इत्याद्युपक्रम्योत्रिमूर्ति दानं दानामुत्तमोत्तममुच्यते॥ त्रिषुवे त्स यने वापि चंद्रसूर्य ग्रहेषु च
नित्यं च पंचदश्यां जन्मर्क्षेपिमारभेत्॥ देवालयेन दातारे पुण्ये पुष्ट्यालयेषु च॥ गृहे वा कारयेद्दानं यत्र भू
मिः शुचिर्भवेत्॥ चतुरस्त्रां समां भूमिं गोमयेनोपलेपयेत्॥ तत्रात्रता नित्तिकरेसुष्मां जलिसमंततः॥ ए
क हस्ता द्विहस्ता वा त्रिगणा दे घ्रतः स्मृता॥ त्रिवेदिका नवेत्रिर्यकृष्ट्वं तत्तंदुलमिश्रिता॥ ब्रह्मा च विष्णुर्भ
गवान्पुरारिर्हिरण्मयास्तत्र निवेशनिया॥ चतुर्भुजाः सायुधभूषणाढ्याः किरीटिनश्चापि यथाक्रमेण

दानम:
॥१५४॥

एतत्स्तुतिमायच्छरणं मुक्तं ब्रह्मांडदाने स्नानार्घपाद्याचमनीयवस्त्रैर्गंधादिभिस्तानभिपूज्य भक्त्या॥ प्रदक्षिणी
कृत्य सपुष्पहस्तः प्रणम्य चोद्धास्य ततः प्रदद्यात्॥ प्रत्येकमेवं बहुमानपूर्वं संप्रदातव्यमनुक्रमेण॥ तथा
जगत्सृष्टिकरस्त्वमेव त्वमेव सर्वस्य पितामहोसि त्वमेव कर्त्ता जगतां विहर्त्ता त्वमेव धाता जगतां विधाता॥ त
त्संप्रदानादनघोपपाहं त्वयाव सायुज्यमुपैमि देव॥ तथा कुरुत्वं शरणं प्रपद्ये मयि प्रमोदेव वरप्रसीद॥
त्वयाजगद्व्याप्तमिदं समस्तं त्वां विष्णुमेव प्रवदंति संत॥ त्वत्स्थानि सर्वाणि वदंति संत॥ त्वत्स्थानि सर्वाणि वदंति
देव त्वयाहृतं विश्वमनंतमूर्त्ते त्वत्संप्रदानादघनघोनवाप्नियथाजगत्कारणकारणोसि॥ तथा कुरुत्वं शर
णं प्रपद्ये मयि प्रमोदेव वरप्रसीद॥ त्वयामरणाममृतं विहाला हलं संगृहतमेव यस्मात्॥ तथासुराणि पुरं
दरस्य मे केषु णालोकहिपार्श्रमीशः॥ त्वद्रूपदानादहमप्यशेषैर्दोषैर्विमुक्तो हि यथा कुरु त्वं शरणं प्रपन्ने म
यि प्रमोदेव वप्रसाद॥ इत्येवमुक्त्वा विधिवद्ददाति स याति सायुज्यमयत्निमूर्त्तेः॥ यः कारयेद्विप्रवरायतस्मै रामः
सुवर्णसंख्यागणितं हिरण्यं दद्याच्च वासो युगमादरेण तथा कृतेतत्संजनते फलं तत्॥ इति त्रिमूर्त्तिदा ॥७०७॥

दानं॥ अथ द्वादशादित्यदानं॥ ब्रह्मांडपुराणे॥ शृणु नारद वक्ष्यं ते दानमादित्यसंज्ञितं॥ यथोक्तं लोकगुरुणा
विष्णुना प्रभविष्णुना॥ कर्तुं पापहरं पुण्यमायुष्यं श्रीकरं शुभं॥ आरोग्यं सर्वमंगल्यं दुःखमाद्भुतनाशनं॥ सर्वशां
तिकरं ह्येतत्सर्वसिद्धिफलप्रदं॥ चक्षुष्यं सर्वरोगघ्नं भुक्तिमुक्तिफलप्रदं॥ विषुवत्स्वयने राहुग्रहणे चंद्रसूर्य
यो जन्मर्क्षे सौरवारे पंचदशार्कसंक्रमे सौरवारे सूर्यसंबंधिवारे सप्तम्यां वा पुनर्नक्षत्रे सा विप्रे श्रुतदर्शने॥ दुः
स्वप्ने दर्शने कुर्याद्दानमादित्यसंज्ञितं॥ देवालये नदीतीरे तडागे वरुणालये॥ अन्ये पुण्यप्रदेशे च शुद्धे वसान व
माचरेत्॥ आलिप्य वै द्वादशहस्तदैर्घ्यां क्षितिं तथा गोमयसंयुतां भि॥ तस्मिन्सिते तंडुलपुंजकैश्च विस्ता
रयेद्द्वादशपंकजानि॥ पादेश मारिणि शुभानि सकर्णिकान्यष्टदेषु तेषु हिरण्यरूपाणि रवे विधाय यथाक्रमे
उत्तरयोपर्वग॥ प्रत्यक्षुरवान्याशु रवणं वा देस्त्र दर्गंधादिभिरादरेण॥ संपूजयतामितसप्तचक्रमेण प्रत्येकमु
च्चार्यतदीयनाम धाता च मित्रश्च ततः क्रमेण मार्त्तंडनामा च तथार्यमाम॥ शक्रश्च देवो वरुणस्तथा सौ
भागो विवस्वानवमस्तथैषां॥ आदित्यनामा सविता तथान्यस्त्वष्टा तथैकादश मस्य तेषां॥ विष्णुस्तथा

द्वादशमः स्वमंत्रैराराधयद्देववरान् द्विजाश्च॥ पुरा देवकृषेर्दानं येन ब्रह्मकमलयांति नात्र थामयापि युष्माकं प्रो
क्तं मुनिवरोत्तमाः॥ द्वादशादित्यप्रतिमालक्षणं ब्रह्मांडदाने प्रागुक्तं वेदितव्यं॥ इति द्वादशादित्यदानं॥
अथ चंद्रादित्यदानं॥ विष्णुधर्मोत्तरे॥ भगवानुवाच॥ अतः परं प्रवक्ष्यामि दानं राजन् नराधिप॥ यद्दत्वा तु
बली राजा शक्रराज्यमवाप्तवान्॥ शक्रश्च बलिराज्यं तु दत्वा पुनरवाप्तवान्॥ चंद्रसूर्योपरागेषु अयने विषुवे
तथा क्षये च द्वादश्यां वैशाख्यां पुत्रजन्मनि॥ कार्त्तिक्यां च महामाघ्यां सप्तम्यां च यथातथा॥ चंद्रादित्यौ तु
दातव्यं सूर्यः सौवर्ण उच्यते॥ शुद्धस्य राजतस्यैव मंडलं हिमरोचिषः॥ द्वादशांगुलवृत्तं तु उभयोरपि मंड
लं॥ वृत्तौ पद्मसमाकारौ मध्ये चैव तु कर्णिका॥ भानुं ताम्रमये पात्रे घृतपात्रे घृतपूर्णे तु निक्षिपेत्॥ सोमं
शंखं क्षीरपूर्णे तु परिस्थापयेद्बुधः॥ सूर्यं तु रक्तकुसुमैः सोमं शुक्लैस्तथैव च॥ कुंकुमं तु पतंगाय दीपं चैव
घृतेन तु॥ एवं संपूज्य यत्नेन चंद्रादित्यौ पृथक् पृथक्॥ अमृतमूर्त्तये सोमं नमोंतेनैव पूजयेत्॥ खखोल्का
येति वै सूर्यं नमोंतेन पुनः पुनः॥ आहूय ब्राह्मणं भक्त्या वेदवेदांगपारगं॥ कुटुंबिनं दरिद्रं च आहिताग्निं



तथैव च॥ रक्तेन वाससाच्छाद्य कुंकुमेनानुलेपयेत्॥ संपूज्य पुष्पधूपैश्च द्विजं सूर्यमिवापरं॥ बिंबं चंद्रबिंबं च
घृतस्थं तु निराशवे॥ समर्पयेद्ब्राह्मणाय मंत्रेणानेन नृमिपः॥ रुक्मं च उक्थं स्वैव पूर्णपुष्करमेव च॥ त्रयी
विद्या तु सांगा यस्यांगं विश्वरूपिणा॥ स वै दिवाकरो देव प्रियतां विप्रसाचिरं॥ एवमुच्चार्य भानुं तु ब्राह्मणा
य निवेदयेत्॥ क्षीरजं देवं तु द्विजराज तथैव च॥ अमृतमूर्त्तिशीतांशुं ददामि ते द्विजोत्तम॥ गायत्र्या चैव सूर्यस्य
अर्हणं जायते विभो सोमतरसमं दीयं शुचिः शुद्धे तेजसा॥ एवं चंद्ररविं दत्वा बली राज्यमवाप्तवान्॥ सर्वं तेन तु
दत्तं स्याद्यो दद्याच्चंद्रभास्करौ॥ सर्वं तेन कृतं राजन् सर्वं तेन वसंस्तुतं॥ सर्वं दक्षिणया चेष्टं संसारे तु नरोत्तमैः॥ पू
ज्यते सिद्धगंधर्वैऋषिभिर्देवदानवैः॥ इति चंद्रादित्यदानं॥ अथ लोकपालाष्टकदानं॥ ब्रह्मांडपुराणे॥ अथ
पुनारद वक्ष्ये ते दानं सर्वाघनाशनं सर्वमंगलमायुष्यमारोग्यं पुष्टिकरं शुभं॥ दानानामुत्तमं दानं सर्वसिद्धिक
रं परं॥ करोति दानं नारी वा साधुजं ब्राह्मणो वदेत्॥ विषुवत्ययने राहुग्रहणे चंद्रसूर्ययोः॥ अन्ये पुण्यकाले
षु जन्मर्क्षेषु विशेषतः॥ देवालयेन दातारो गृहे वा दानमाचरेत्॥ पुष्पदेशेषु सर्वेषु पुराणोक्तेषु नारद॥ चतुर

दानम०
॥२५६॥

स्तांसमांभूमिंलिप्तांगोमयवारिणा॥ षड्ढूरं वाष्टहस्तेवा दशाष्टदश वा करान्॥ प्राच्योदिच्यस्व कर्त्तव्या रेखा
श्वेतस्तकाःस्मृता॥ नवकोष्ठानि तत्रस्युः श्वेततंडुलपुंजकैः॥ सितैरष्टदलैर्युक्तान्कमलान्विन्यसेद्बु
धान्॥ राजतरूपमयंदेवंजगत्कर्त्तारमव्ययं॥ तेषाम मध्यमकोष्ठेषु कमलस्थं निवेशयेत्॥ इंद्रमग्निं यमंचैव
निर्ऋतिं वरुणंतथा॥ वायुंसोमंतथेशानं प्रागादिषु यथाक्रमं॥ जातरूपमयान्देवान् अष्टौस्वायुधसं
युतान्॥ विपुलान्वाकृतुवर्णांस्तु यथाशक्तिविनिर्मितान्॥ ब्रह्मणोभिमुखान्सर्वान्सर्वेषु विनिवेशयेत्॥
जातरूपमयंस्वर्णमयं कमलस्थं ब्रह्मणं॥ ब्रह्मलोकपालप्रतिमालक्षणं ब्रह्मांडदानेद्रष्टव्यं॥ प्रत्येकंवा
ससावेष्टसंप्रोक्तकुशवारिणा॥ योसौकारयिता विप्रस्त्वेवमेतत्समाचरेत्॥ दानकालेतुसंप्राप्ते दातास्ना
तःकुशोदकैः॥ प्रसन्नचित्तवदनः परमेष्ठिपुरोगमान्॥ स्वनाममंत्रैरभितोनमोंतैराराध्यगंधपिरादरेण॥
विप्रांस्तथाभ्यर्च्य यथाक्रमेण संप्रीयतामयमित्येवयुक्ता॥ योसौकारयिता विप्रस्तस्मै दद्याच्च दक्षि
णांतु वर्णसंख्यागणितं हिरण्यंचैव वाससा॥ प्रोक्तं देवऋषेदानं लोकपालाख्यं मया॥ किमन्यच्छ्रोतु

राम:
॥७०५॥

मिच्छासि तदिदं वद सांप्रतं॥ इतिलोकपालाष्टकदानं॥ अथपंचग्रहदानं॥ ब्रह्मांडपुराणे॥ ब्रह्मोवाच॥ ग्रह
दानंक्रमंवक्ष्ये सर्वसिद्धिकरंपरं॥ सर्वशांतिकरंनृणां सर्वपापप्रणाशनं॥ विषुवत्ययनेराहुग्रहणेशशिसू
र्ययोः॥ जन्मर्क्षेसौरभेरेवापंचदशंपांतथैवच॥ युगपकालेषुसर्वेषुसर्वेषुपुण्यप्रदेशेविशेषतः॥ ग्रहदा
नंतुकर्तव्यंनित्यंश्रेयोभिकांक्षिणा॥ हस्तमात्रंद्विहस्तंवात्रिहस्तंवाथनारद॥ चतुरस्रांसमांभूमिंगो
मयेनोपलेपयेत्॥ रेखाप्राच्यश्चतत्रस्तास्तथासमाः॥ नवकोष्ठंपद्मानिविन्यसेद्धेततंडुलैः॥ आदित्यश्चं
द्रमाभौमोबुधोजीवसितार्कजाः॥ राहुकेतुरितिप्रोक्ताग्रहालोकसुखावहाः॥ एषांहिरण्यरूपाणि॥
कारयित्वायथाविधि॥ त्रिनिष्केणपवाकुर्याद्यथाशक्त्याष्टपकुष्टपकु॥ हिरण्यरूपाणिहिरण्य
प्रतिमात्तथ्य्रप्रमाणान्यत्रैववक्ष्यते॥ आदित्यंमध्यमेकोष्ठेदक्षिणेंगारकंन्यसेत्॥ उत्तरेतुगुरुंविद्यादबु
धमुत्तरपूर्वके॥ भार्गवंपूर्वतोन्यस्यसोमंदक्षिणपूर्वके॥ पश्चिमेर्कसुतंन्यस्यराहुंदक्षिणपश्चिमे॥ प
श्चिमोत्तरतःकेतुःसंनिवेश्यायथाविधि॥ तद्दर्भपुष्पगंधाद्यैरर्चयेत्स्वस्वमंत्रकैः॥ दानंसूर्योपवाकु

यान्याभीवीतन्त्रांस्तु नारद। अनुलेपनादियत्कार्यं सर्वं विप्रेण कारयेत्। स्नानकाले तु संप्राप्ते स्नात्वा कुर्यात्ति
लोदकैः। प्रयतो यजमानस्तु धौतवस्त्रप्रसन्नधीः। अर्चयित्वा स्वयं दद्यादहस्करमुखान् ग्रहान्। क्रमे
क्रमेकं चिपोसौ स्वस्वमंत्रमुदीरयेत्। पद्मासनः पद्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहः। दिवाक
रो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः। श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडकरो।
द्विबाहुः। चंद्रोमृतात्मा वरदः किरीटी मयि प्रसादं विदधातु देवः। श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंड
करो द्विबाहुः। चंद्रोमृतात्मा वरदः कीरीटी श्रेयांसि मह्यं प्रददातु देवः। रक्तांबरो रक्तवपुः किरीटी च
तुर्भुजो मेषगदाभृतः। धरासुतः शक्तिधरश्च शूली सदा मम स्याद्वरदः प्रशांतः। पीतांबरः पीतवपुः किरी
टी चतुर्भुजो देवगुरुः प्रशांतः। दधाति दंडं च कमंडलुं च तथाक्षसूत्रं वरदोस्तु मह्यं। श्वेतांबरः श्वेतवपुः
किरीटी चतुर्भुजो दैत्यगुरुः प्रशांतः। तथाक्षसूत्रं च कमंडलुं च बिभ्रद्वरदोस्तु मह्यं। नीलद्युतिः शूलधरः
किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्। चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्यं वरमंदगामी। नीलांब

रामः
७२०

रो नीलवपुः किरीटी करालवक्त्रः करवालशूली। चतुर्भुजश्चर्मधरश्च राहुः। सिंहासनस्थो वरदोस्तु मह्यं
धूम्रो द्विबाहुर्वरदो गदाभृत् गृध्रासनस्थो विकृताननश्च। किरीटकेयूरविभूषितांगः सदास्तु मे केतुग
णः प्रशांतः। इत्यस्मादापयेत्सर्वानादित्यादीन्ग्रहान्। पुरुषो वाप्यनारी वा यथोक्तं फलमाप्नुयात्। मध्य
मं पुरुवेद्याद्वा न्यस्मै वा प्रदापयेत्। गुरुरत्र पूजादिकर्ता। अथवा दक्षिणा देया सुवर्णं वा ससीसमेइत्याह
भगवान्ब्रह्मा नारदाय महात्मने। तथाहमब्रुवं दानं युष्माकं मुनिसत्तमाः। इति ग्रहदानं। अथ वारदानानि
कथ्यंते। आदित्यादिषु वारेषु सहिरण्यं प्रदेवतु यः प्रयच्छति तन्मुक्तिस्तस्य तुष्यंति वै ग्रहाः। दद्यादा
दित्यमादित्ये सोमं सोमे कुजं कुजे। एवं बुधादीन्संदद्यात् राहुकेतुशनैश्चरान्। इति वारदानानि। अथ शूल
दानं। वायुपुराणे। यानि कृतिस्तु पापानाहतानां प्रजयाविना। पन्यासु यजमानस्य तान्यत्र देवस्य शू
लिनः। तस्य प्रदानात्सकलं तत्पापं संप्रणश्यति। क्रमप्रदेश्चतुर्दश्यामष्टम्यां वासिते तरे। ऊर्ध्वाद
दत्तानि केन त्रिशूलेन लक्षणान्वितं। निष्कचतुष्कः सौवर्णिकः सौवर्णमात्रं षट्पंचाशद्धिकत्रा तद

दानम०
॥१५८॥ यपणमस्यां चेति पदत्रयं शान्तपाठ्येय॥ सुगंतकरणं घोरसघविध्वंसनं परं॥ नानारंजो विरचिते चक्रषेउ॥
शारं परिभाषायामुक्तं॥ नात्मौनि धायसं पूर्णंजिलां ताम्रनिर्मितं॥ पात्रमाढकसंमानं तत्र मूलं न्यसेत्सु
नु॥ कुर्यात्तेनैव मंत्रेण तस्य पूजामनुक्रमात्॥ तेनैव मूलायतनमंत्रेण विरूपाक्षं च तत्पार्श्वैकमलोपरि
पूजितं॥ अघोरेभ्योपि मन्त्रेण पूजांते प्रणिपत्य च॥ अघोरमंत्रस्तु लिंगे॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्य
॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः॥ विप्रं च ज्ञानिनं तद्वत्संपूज्य मुनिपुंगवाः॥ प्रदक्षिणं सतो
गत्वा इमं मंत्रमुदीरयेत्॥ भगवन्भगनेत्रघ्न दक्षयज्ञप्रमर्दन॥ न वायुधप्रदानेन पापं नश्यतु शंकर
युगांते येन लोकानां त्वमंतुक विनाशनः॥ विदग्धं तत्स्वपापेन तेन पापं व्यपोहतु॥ येन दग्धं शरणं त्रैनित्रि
पुरं सुरदुर्जयं॥ तेन पाशुपतेनाशु मम पापं विनाशय॥ यद्बुद्धिकृतं पापं मम वा कस्य च मानसं॥ तत्स
र्वं क्षयमभ्येतु तव शूलप्रदानतः॥ इत्यामंत्र्य ततो दद्याच्छूलं तस्मै द्विजातये॥ अवश्यं कुरुते पापमज्ञान रामः
न्मानवो यतः॥ वर्षे वर्षे ततो दद्यात्तस्यास्तस्यापनुत्तये॥ इति शूलदानं॥ अथात्मप्रकृतिदानं॥ भविष्योत्तरे ॥७१२॥

दानकालः सदा तस्येत्युक्ता॥ हैमी प्रतिकृतिं भव्यां तिर्भयां कारयित्वात्मनोन्यप॥ अन्नाष्टवाहनगतामिष्टा
लंकारभूषितां॥ अभिष्टलोकसहितां सर्वोपस्कारसंयुतां॥ अभीष्टलोकः प्रियजनः॥ नेत्रपटपटीवस्त्रै
श्छादितां स्रग्विभूषितां॥ कुंकुमेनानुलिप्तांगीं कर्पूरागरुवासितां॥ स्त्री चेद्दद्यानु शयने शायितां कारयेत्स्वायं
य घृदिषु हतमं किंचित्सर्वं पार्श्वतो न्यसेत्॥ उपकारकरं स्त्रीणां पुरुषाणां च यद्भवेत्॥ तत्सर्वं स्थापयेत्स
र्वं स्वयं संचिंत्य चेतसि॥ एतत्सर्वं मेलयित्वा स्वस्थाने नियोजयेत्॥ ॐ अद्येत्यादि मासन्नशतवर्षपर्यंतं सुरसा
दित्येन स्वर्गादिष्वभोगोत्तरजन्मनीष्टबंधुजनावियोगकामनयात्मप्रकृतिदानं करिष्य इति संकल्प्य पूजयित्वा
लोकपालान्ग्रहान्देवान्विनायकं देवीं दुर्गां॥ ततः शुक्लांबरः स्नात्वा गृहीतकुसुमांजलिः॥ इममुच्चारयेन्मंत्रं विप्र
स्य पुरतः स्थितः॥ आत्मनः प्रतिमा चेयं सर्वोपकरैर्युतां॥ सर्वरत्नसमायुक्ता तव विप्र निवेदिता॥ आत्मा शंभुः
शिवः शौरिः शक्रः शिवगौरीयुतः॥ तस्मादात्मप्रदानेन मम चात्मा प्रसीदतु॥ इत्युक्त्वा मासपक्षादिकौ ब्रि
रस्य पूर्वोक्तं सायेत्यादिकामां तं संकल्पवाक्यमुक्त्वा इमामात्मप्रतिमां सोपस्करां ममुकशर्मणेऽमुक

गोत्रायुतुभ्यमहं संप्रददइत्याचार्यततोदद्यात्कुलगायगुधिष्ठिर ब्राह्मणांश्चापयुञ्ज्य त्रीतिकोददितिचकीर्त्त
येत् ततःप्रदक्षिणीकृत्यप्रणिपत्यविसर्जयेत् विधिनानेनराजेंद्रदानमेतत्प्रयच्छति यःपुमानथचाना
राम्नृणुयत्फलमाप्नुयात् साग्रंवर्षशतंनव्यंसर्वलोकेसुरैर्वृत अभिष्टफलदानेनचाभीष्टफलमाप्नु
वेत् यत्रैवोत्पद्यतेजंतुप्राप्तःकर्मद्धयं तत्रैवसर्वकामानांफलमाजायतेनृप इष्टवंधुजनैःसार्द्धंनवियो
गंकदाचन प्राप्नोतिपुरुषोराजन्स्वर्गंवानंत्यमश्नुतइति इसात्मप्रतिमादानं अथधनदमूर्त्तिदानं वायवी
ये दरिद्रोजायतेमर्त्योदानविघ्नंकरोतिय ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे फलार्द्धेनतदर्द्धेनतदर्द्धेन
वापुन पलेननवातदर्द्धेनतदर्द्धार्द्धेनवैक्वचित्पा व तदर्द्धेनाथवापुनःशितनकचित् धनदस्यप्रतिकृतिं
कुर्यात्स्वर्णमयींशुभां द्विभुजांवाहनोपेतांनयनानंदकारिणी धनदरूपंतुकृष्णमापिंगनेत्रंचगादिनं पीत
विग्रहं पुष्पकस्थधनाध्यक्षं ध्यायेच्छिवसमंसदेत्यादिनोक्तं शंखपद्मनिधिभ्यांचयुक्तांतत्पार्श्वयोर्द्वयो



श्वेतवस्त्रेणसंवेष्टांतंडुलोपरिविन्यसेत् तंडुलानांपरिमाणंनवद्रोणाचतुष्टयं तदर्द्धंवित्तशाठ्यंनकारये

त् श्वेतामाल्यैस्तथागंधैरनुलिप्यप्रपूजयेत् आग्नेय्यांदिशिहोमश्चसमिदाज्यतिलैर्भवेत् मंत्रोराजाधि
राजायेत्येषयोज्यःस्वलिंगकै आहुत्यातिलहोमश्चकर्त्तव्योधनकांक्षिभिः आचार्यःसर्वशास्त्रज्ञोविनीतःसर्वसं
मतः महाकुलप्रसूतश्चधर्मज्ञःसत्यवाक्शुचिः कारयेदर्चनंतेनधनदस्यातिभक्तितः तद्दैवत्येनमंत्रेणसच
कामाश्वरोभवेत् तस्मैहोमंकृतवतेप्रदद्यात्प्रतिमांतुतां मंत्रेणानेनविधिवत्प्राङ्मुखायप्रदङ्मुखः
मंत्रप्रयोगेज्ञेयः एवंकुवेरदानंयःकरोतिविधिपूर्वकं धनदेनसमोमर्त्यस्तत्क्षणादेवजायते अथप्रयोग
सार्द्धमाषद्वयाधिकांपंचाशन्माषावधिकुवेरमूर्त्तिंपुष्पकविमानस्थांपार्श्वयोःपद्मशंखाकारयुतांकृ
त्वांहोत्वादियिपेष्टधनकर्मोहंधनमूर्त्तिदानंकरिष्यइतिसंकल्प्यश्वेतवस्त्रांमूर्त्तिंयथाशक्तिएकद्वित्रचतुर्द्रोण
तंडुलराशौविधायसंपूज्यतदाग्नेय्यामग्निंसंस्थाप्यसमिदाज्यचरुभिःप्रत्येकमष्टाविंशत्याष्टोत्तरसंख्यया
राजाधिराजायेतिमंत्रेणाहुतिभिश्चतिलैश्चहुत्वाचार्येणधनदपूजांकारयित्वातन्नराशाय वैतेदेवकु
वेरनरवाहनयक्षशंखनिधानांतंयतिश्रीकंववृत्तनःदानादेनयथाप्राप्तंदारिद्र्यंममदुःखदं तत्सर्वमा

त्मा दानेन पापमाशु विनाशयेतिमंत्रमुच्चार्येत्यादि॰ इमां धनदमूर्तिं दारिद्र्यनाशकामोमुकगोत्रायामुकशर्म
णे तुभ्यमहं संप्रददे न मम इति दत्वा देयद्रव्यतृतीयं चतुर्थं वांशं सुवर्णं दक्षिणां दद्यात्॥ इति धनदमूर्तिदा
नं॥ अथ शालग्रामदानं॥ शालग्रामशिलाचक्रं यो दद्याद्दानमुत्तमं॥ भूचक्रं तेन दत्तं स्यात्ससैलवनकान
नमिति पाद्मे॥ शालग्रामदानं सशैलवनकाचक्रदानफलसमफलकाम इति दानवाक्यं मंत्रस्तु महाक्ले
शनिवासेन चक्रादौ रूपशोभितः॥ अस्य देवस्य दानेन मम संतु मनोरथा॥ इति॥ अथ कालपुरुषदानं॥ भ
विष्योत्तरे॥ कालोदानविधिं पार्थ क्रियमाणं यथातथं॥ फलं यमुनिभिः प्रोक्तं विपरीतोपायश्च ज्ञेयं नि
ष्कशतं पार्थ दानेयं विधिरुत्तमं॥ मध्यमस्तु तदर्धेन तदर्धेनावरः स्मृत॥ एवं हृद्धेरथैर्देश्च धेनोः कृष्णाजिनस्य
च॥ अशक्तस्यापि कृपोयं पंचसौवर्णिको विधिः॥ अतोपल्पेन यो दद्यान्महादानं नराधिपः॥ प्रतिगृह्णाति
वा तस्य दुःखशोकौ कावहं भवेत्॥ द्रोणमहादानेषु कल्पवृक्षरथो हिरण्याश्वरथः॥ अहं ब्रह्मांडं धेनुः काम
धेनुः॥ पुण्यं दिनमथासाद्य भूमभागे समे शुभे चतुर्दश्यां चतुर्थ्यां वा विद्धां वा पांडुनंदन॥ पुमान्कृष्णाजिने



कायेरौप्यदंतस्सुवर्णादकृ खड्गोद्यतकरो दाढीजपाकुंडलः॥ रक्तांबरधरः स्रग्वी शंखचक्रविभूषितः॥ ता
म्रासिपुत्रीबंधेन विस्फारितकटीतटः॥ असिपुत्री छुरिका॥ उपानद्युक्तांघ्रिः कृष्णकंबलपार्श्वगः॥ गृही
तमांसपिंडश्च वामे करतले तथा॥ एवंविधं पुमान्कृत्वा गृहीतकुसुमांजलिः॥ यतमानः प्रसन्नात्मा इमं मं
त्रमुदीरयेत्॥ संपूज्य गंधकुसुमैर्नैवेद्यैर्विविधैश्च॥ सर्वं कलयसे यस्मात्कालस्त्वं तेन चोच्यसे॥ ब्रह्मविष्णु
शिवादीनां त्वमसाध्यो सि सुव्रतः॥ पूजितस्त्वं मया भक्तपापाद्विश्वत पासुरवं॥ तद्धुध्यते भवविनीतकुरुष्व
नमो नमः॥ एवं संपूजयित्वा तं ब्राह्मणाय निवेदयेत्॥ ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणैस्तथा॥ दक्षिणां शक्ति
तो दद्यात्प्रणिपत्य विसर्जयेत्॥ दक्षिणां चात्र कथिता निष्कशतादिरूपां॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति
नापमृत्युभयं तस्य न च व्याधिकृतं भवेत्॥ भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः॥ देहांते सूर्यभवनं भित्वा या
ति परं पदं॥ मिति पुण्यक्षयं दिव्हा भवराजा भवति धार्मिकः॥ सत्ययाजी श्रिया युक्तः पुत्रपौत्रसमन्वितः॥ संपूज्य
कालपुरुषं विधिवद्विजाय दत्वाशु नाभ्रुवफलोदयहेतुभूतं॥ रोगातुरो सकलदोषमये च देहे देहो न मे

दानम०

॥२६१॥

हमुपगच्छति तत्प्रभावात्॥ अथ प्रयोगः॥ चतुर्थ्यां चतुर्दश्यां नष्टाकरणे वारोप्यदृशायां सुवर्णेन खड्गो
द्यतकरं मांसपुंडधृतवामकरं जपाकुसुमकुंडलरक्तस्रग्विणं शंखमालाधरं छुरिकया पुत्तकं छिद्रंतमतिदी
र्घं कृष्णाजिने कालपुरुषं निर्माप्येत्यादि अपमृत्युव्याधिसर्वबाधानिवारणायायुरैश्वर्यप्राप्तिमरणोत्तर
परपदतदुत्तरधर्मश्रपुत्रपौत्रादिकर्तृत्वराज्यकामः कालपुरुषदानं करिष्ये इति संकल्प्य॥ कालपुरुषं
विधिवच्च संपूज्य पुष्पांजलिं गृहीत्वा सर्वकालपरो यस्मात्कालस्त्वं तेन वोच्यते॥ ब्रह्मविष्णुशिवादीनां त्वम
माधोऽसि सुव्रत॥ पूजितस्त्वं मया भक्त्या पापौघं विनश्यपयास्तु खं यच्छुध्येते तव विनीत कुरु घनमेनमश्
तिं त्वमुक्त्वा ध्येत्यादि॥ अथ मृत्युव्याधौ कांतं पूर्वोक्तसंकल्पवाक्यं चोक्त्वेमं कालपुरुषं सोपस्करममु
कगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददे न मम इति दत्वा पंचसुवर्णाद्रूर्ध्वं मानिष्कशतं दक्षि
णां दत्वा अयमीदानविप्रभोजनादि कुर्यात्॥ इति कालपुरुषदानविधिः॥ अथ कालचक्रदानं॥ मृ
त्युंजये चक्रं रूप्यमयं कृत्वा मुखारस्मिमयात्मकं कृत्वा मूर्ति शिरस्थं चंद्ररश्मिभिः ध्यांतरस्थितं तमःशतेकरू रामः

७२५

पाणिगात्रेषु च समंततः॥ एवं ध्यानवतस्तस्य मचेंद्र॥ कृत्स्नतां व्रजेत॥ ततोऽप्यनंतरं पश्चात्स्थित्वा विप्रं च दक्षिणां
तं गृहीत्वा व्रजेत् दूरं अदृष्टत्वमथ व्रजेत्॥ स्वयं चाप्यतसं घातपूर्णकायात्स्थितस्थितिः॥ कालचक्रमिदं
नाम्ना दानं मृत्युविनाशनं॥ इमं तं राजतं चंद्ररश्मिजालसमाकुलं॥ अपमृत्युविनाशाय ददामि तिस
मुत्तरन्॥ सुवर्णं दक्षिणायुक्तं ब्राह्मणाय निवेदयेत्॥ एवं कृते विनश्येत अपमृत्युं विनाशय॥ तस्मादे
तत्समादेयं अपमृत्युभयान्वितैः॥ ज्वरादिरोगयस्तैर्वा महापत्सतितैरपि॥ ततो गृह्योक्तविधिना स्थापयेज्ज
तवेदसं जुहुयात्कालनाम्ना तु शतमष्टोत्तरैस्तिलैः॥ ततस्तु भोजयेद्भक्त्या विप्रान्द्वादशसंख्यया॥ स्वयम
क्षारलवणं भुंजीत सह देवतु॥ एवं कृते नरो नूनं चिरंजीवेन्न संशयः॥ अथ वा सादि वा अपमृत्युनिवार
णकामः कालचक्रदानं करिष्ये इति संकल्प्य शक्तितो रौप्यकृतं चंद्राकारमनेकमुक्तामालात्मकरश्मियुतं
कालचक्रं विधिवत्संपूज्य इमं तेजतं चंद्ररश्मिजालसमाकुलं॥ अपमृत्युविनाशाय ददामि तिसमुद्धरन्॥ इ
दं कालचक्रं मुक्तादामयुतं अपमृत्युनिवारणकामोमुकगोत्रायामुकशर्मणे विप्राय तुभ्यमहं संप्रददेन

ममेति दत्वा सुवर्णं दक्षिणां दत्वाग्निं संस्थाप्य कालचक्रं यं स्वाहेत्यष्टोत्तरशतं तिलैर्हुत्वा द्वादश विप्रान् भोजयि
त्वा स्वयमष्टाक्षरमस्त्रवर्णं सहस्रं भुंजीतेति कालचक्रदानविधिः॥ अथ यमदानं॥ मृत्युंजये॥ लोहपात्रे स्थितं कां
स्यं तत्रापि स्थितं राजतं तस्मिन्कालेश्वरः स्वर्णैः पुरुषाकारतां गतः॥ यमस्तु यं तु ईषत्पीतो यमः॥ कार्यो दंडह
स्तो विजानता॥ रक्तहस्तपाशान्तकृत इति॥ वस्त्रालंकारसंयुक्तो भयदास्त्राणि सर्वतः॥ त्रिलोहाकारपु
रुषैः कालदूतैश्च पार्श्वतः॥ भयदास्त्राणि खड्गादीनि त्रिलोहे कांस्यताम्रपित्तलाख्यं॥ कालदूतैर्दंडहस्तं
त्रिभिः पुरुषाकारैः॥ कृत्वा च माहिषे पृष्ठे तद्दद्यद्यमभाजने॥ आसनपद्दद्दाम सुवर्णं॥ अष्टम्यां च चतुर्द
श्यां करोति विधिवत्तु यः॥ समुच्यते ध्रुवं नाशात् दत्वा घृतघटोत्तरं॥ नाशो मृत्युः॥ घृतघटउत्तरो दक्षिणो
स्यनेयस्येति दानविवेके॥ अपरे तु दक्षिणा सुवर्णमिति॥ इति यमदानं॥ अथ पुष्करदानं॥ ब्रह्मांडे॥ भूमौ गो
मयलिप्तायां दक्षिणोत्तरतः शुभां॥ निधाय तत्र पाणिभ्यां पूर्णां निसततंडुलैः॥ चत्वारि तेषु हैमानि मंड
लानि निवेशयेत्॥ मंडलानि स्थालाकाराणि कुंभानित्यन्ये सौवर्णान्यत्र ततो देवान् अर्चयेच्च यथाक्रमं



पूर्वमात्मनुवंतत्र विविष्टश्रवसं ततः॥ कृत्तिकासप्तमीशानं वज्रपाणिशतक्रतुः॥ गंधादिभिरथाभ्यर्च्य दक्षि
णोत्तरतः क्रमात्॥ प्रत्येकमेकं विप्रेभ्यो दद्याद्दास्यभक्तितः॥ ते तं देवमिह ध्यात्वा मंत्रानेतानुदीरयेत्॥ स
प्रीयतां मे भगवान् आत्मभूरिसुदीरयेत्॥ संप्रीयतां जगद्व्यापी भगवान् विष्टरश्रवाः॥ संप्रीयतां मे भगवा
न् कृत्तिवासा इति ध्रुवं॥ संप्रीयतां मे भगवान् वज्रपाणिशतक्रतुः॥ एवमाह पुरा ब्रह्मा नारदाय सुरर्षये
प्रोक्तं मयापि तत्सर्वं युष्माकं मुनिपुंगवाः॥ अत्र ब्रह्मविष्णुशिवेन्द्रपणशक्तिसुवर्णमया॥ कार्याः अ
मुष्कामो ब्रह्मविष्णुशिवेन्द्रप्रतिमादानमहं करिष्य इति संकल्प्य लोहपात्रे कांस्यपात्रं तस्मिन् रौप्यमयं त
स्मिन् सौवर्णमहिषं दंडपाशकरं पीतं यममनं कृतस्यामीये हैमानि खड्गाद्यस्त्राणि त्रिलोहघटितान् दंडकरा
न् कालदूतांश्च संस्थाप्य तिथ्यादि स्मृत्वा ऽपमृत्युनिवारणकामो यमदानं करिष्य इति संकल्प्य स
वाहनइनाय यमविप्रं च संपूज्याद्येत्यादि अपमृत्युनिवारणकाम इमां पूर्वोपस्करयुताममुकश
र्मणे ऽमुकगोत्राय विप्राय यादातं संप्रददे न ममेति दत्वा दक्षिणां सुवर्णं दद्यात्॥ इति आयुष्करदानं॥ अ

पसंपत्करं॥ ब्रह्मांडे॥ संपत्करदानमतीव पुण्यं यस्मिन्कृते संपदोभ्येति जंतुः तथा आयुष्करं रोगहरं तु पा
पविनाशनं नाशकरं त्वघानां स्वर्गविवेकैकफलं तु तत्र हि द्विज्ञियं तथा च भवती इष्टसिद्धिः॥ तथा कालेषु सू
र्यग्रहणादिकेषु तारेषु जन्मत्रितयेषु कार्यं देशेषु देवायतनादिकेषु गृहेषु वा यत्र मनः प्रसन्नं स्ना
त्वा प्रातस्तिलमिश्रैः कुशोदैः॥ शुचिर्भूत्वा धौतवासा प्रयतः॥ संकल्प्य विप्रं उपगुरुं च कार्यं न तस्यानुमते
न सर्वं गुरुं वृत्वेति शेषः॥ गव्येन भूमिं कृत्वा जलेन चालेपयेद्विशाकमात्रहस्तं॥ तत्रैव लेख्याश्चतुरः स
मास्तु प्राच्यश्च तिर्यक् च यथोपदिष्टं॥ नवकोष्ठानि तत्रस्तु तेषु पूर्णानि तंडुलैः॥ निधातव्यानि पात्राणि वा
सोभिरभिवेष्ट्य च॥ पात्राणि कुंभान् पलस्यार्वाक् त्रिनिष्कार्धं यथाशक्ति विनिर्मितान्॥ निष्कोत्र सुवर्णः॥
दक्षिणोत्तरतो देवान् रूपमयान्न्यसेत्॥ पश्चात्कोष्ठत्रितये तु मित्रं तथा च देवं वरुणं च सोमं॥ चतुर्भुजं
मध्यमकोष्ठके तु जगत्पतिं विष्णुमुमापतिं वा दिवाकरं वृत्रहणं च वह्निं संपूज्य सर्वान् विधिवत्क्रमे
णा मित्रलक्षणं तु॥ पद्मगर्भसमः कार्यो मित्रः कमलसंस्थितः॥ आजानुलंबिना लोतर्विकचांभोजद



क्षुस्तु॥ वरुणादिरूपमुक्तं ब्रह्मांडदाने॥ सम्यगर्च्य विधानविद्गंधवस्त्रैः पृथक् पृथक्॥ दातव्यमनुक्रमेण॥ सं
प्रीयतां मे यमित्येवमुक्त्वा ततो हि दद्यात्सोदकं पूर्वमत्र॥ एकस्यचैकच हिरण्यरूपं॥ प्रणाम पूर्वं परि
णीय सर्वान्॥ पात्राणि वासः परिधाय चैव सतंडुलं सहिरण्यं च दत्वा॥ समिष्टसिद्धिं लभते च सर्वामायुष्यमा
रोग्यमुपैति चाग्र्यं॥ अथोपदेष्टुर्गुरवे सुवर्णवासोयुगं दानसमं च दद्यात्॥ विप्रैस्तथा वाचयेत्स्वस्ति वाच्यं
ततो दद्याद्दक्षिणां वाचकेभ्यः॥ अथ प्रयोगः॥ प्रातस्तिलकुशमिश्रोदकेन स्नात्वा धौतेत्यादि॥ संपदायुरारोग्य
पापनाशपुत्रादिकुलवृद्धिश्री स्वर्गमोक्षेष्टसिद्धिकामो मित्रादिप्रतिमादानं करिष्य इति संकल्प्य गुरुं वृ
त्वा तेनाज्ञप्तो विशाहस्तां चतुरस्रां भुवं गोमयेनालिप्य तत्र प्रागायताश्चतस्रो लेखा लिखित्वा त
त्रजातेषु नवकोष्ठेषु तंडुलान्निक्षिप्य तेषु नवकुंभान्सुवस्त्रान् विधिना संस्थाप्य तेषु सुवर्णत्रयाद्यपा
लावधि हेम्नाकृताः प्रतिमाः स्थापयेत्पूजयेच्च॥ तत्र पश्चिमपंक्तौ उदक्संस्था इति मित्रं वरुणं मं च
मध्यमपंक्तौ चतुर्भुजो विष्णुमुमापतिं च॥ प्राक्पंक्तौ दिवाकरं वृत्रहणं वह्निं च॥ ततो नवविप्रान्संपू

ज्ये कैकस्मै विप्राय मित्रः प्रीयताम् इत्यादि कांतं पूर्वोक्तं फलमुक्त्वाऽमुकशर्मणेऽमुकगोत्राय विप्रा
येमांसं प्रददे इति दद्यात् ॥ एवं च वरुण । प्रीयतामिति वरुणादिष्वति र्मांतु वेदेद्य द्रव्यसमं सुवर्णं वस्त्र
युगं च दद्यात् ॥ इति संवत्सरदानं ॥ अथ कृष्णाजिनदानं ॥ सौरे ॥ कृष्णाजिनं च महिषीमेषीं च दद्याद्धेनुं
वा ब्रह्मलोकप्रदायीनि तुलापुरुषवच्च ॥ गोश्च हिरण्यसंयुक्तं मार्गमेकं दशातिय ॥ सर्वं दुष्कृतकर्मा
पि सायुज्यं ब्रह्मणो व्रजेत् ॥ मरीचिः ॥ कृष्णाजिनोपयस्तु रवौ यो दद्याद् द्विजातये ॥ सप्तजन्मकृतं पापं त
त्क्षणादेव नश्यति ॥ कृष्णाजिनं समं दानं न चास्ति भुवनत्रये ॥ प्रतिग्रहोऽपि पापी स्यात् इति वेदविदो
विदुः ॥ मात्स्ये ॥ वैशाखी पौर्णमासी च ग्रहणं शशिसूर्ययोः ॥ पौर्णमासी तु या माघे आषाढी कार्त्तिकी त
था ॥ उत्तरायणं द्वादशी वा तस्यां दत्तं महाफलं ॥ आहिताग्निर्द्विजो यस्तु तद्देयं तस्य पार्थिव ॥ यथा ये
न विधानेन तन्मे निगदतः शृणु ॥ गोमयेनोपलिप्ते तु भूभागे देशे नराधिपः ॥ आदावेव समास्तीर्य शो
भनं वस्त्रमाधिकं ॥ ततः सशृंगं सखुरं आस्तरेत्कृष्णमार्गणं ॥ कर्त्तव्यं रुक्मशृंगं तु रूप्यदंतं तथैव च



लांगूले मौक्तिकैर्युक्तं तिलछन्नं तथैव च ॥ तिलैः सत्समं कृत्वा वाससाच्छादयेद् बुधः ॥ सुवर्णनाभं सत्कु
र्याद् अलंकुर्याद् विचक्षणः ॥ रत्नैर्गंधैर्यथाशक्त्या तस्य दिक्षु च विन्यसेत् ॥ कांस्यपात्राणि चत्वारि दिक्षु दद्याद्य
था क्रमं ॥ अन्नमयेषु च पात्रेषु पूर्वादिषु क्रमेण तु ॥ घृतं क्षीरं दधि क्षौद्रं एवं दद्याद्यथाविधि ॥ सरलानि कांस्य
पात्राणि चतुर्दिक्षु स्थापयेत् ॥ अन्नमयानि च घृतक्षीरदधिमधुपूर्णानि पूर्वादिदिक्षु स्थाप्यानि चंपतस्पत
यावगारवान्न्यूनं कुंभमेव च ॥ आहोपस्थानकं कृत्वा सुनविष्टानि वेशयेत् ॥ दानदेशाद्वा होत्र उपसमीपे
स्थानं यस्येति कुंभ विशेषणं ॥ जीर्णवस्त्रेणोपीतेन सर्वांगानि च मार्जयेत् ॥ धातुमयानि पात्राणि पादे प्रस्थ
उदापयेत् ॥ आनुदापयेत् ॥ ध विशेषाः पात्रमध्यस्थानि चक्राणि च मंत्रतः प्रयोगे बोधानि ॥ तिलपूर्णं ततः
कृत्वा वामपादे निवेशयेत् ॥ मधुपूर्णं तु तत्कृत्वा पादे वै दक्षिणे न्यसेत् ॥ एतत्पात्रद्वयं पश्चिमपादयोः स्थाप्यं
ऊर्ध्वपादे विनिकार्ये ताम्रस्य रजतस्य च ॥ ऊर्ध्वपदित्व यपादयोः ॥ एकवचनमविवक्षितं ॥ ताम्रपात्रं तिलपू
र्णं दक्षिणपादे रजतपात्रं मधुपूर्णं वामपाद इति व्यवस्था प्रयोगे वक्ष्यमाणमंत्रात् ॥ सुवर्णपात्रमस्त

दानम०

॥२६५॥

तापूर्णं मध्ये स्थापयेत् इति हेमाद्रिः॥ हेममुक्ता विद्रुमं चंडादिमं बीजपूरकं प्रशस्तपत्रे श्रवणे खु
रेशृंगाटकानि च ॥ एवं कृतायथोक्तेन सर्व शाकफलानिच ॥ तस्मैतिथ ह्वविद्विद्वानाद्दिता ग्निर्द्विजोत्त
मः॥ स्नातोवस्त्रयुगच्छन्नस्वशक्त्यावाप्य लं कृतः॥ प्रतिग्रहस्वतस्येक्ताः तुष्ठदेवो महायते॥ सुवर्णेना
भिकं दद्यात्प्रीयतो वृषभध्वजः॥ अथ प्रयोगः॥ पूर्वोक्तकाले गोमयेनोपलिप्ते देशे शोभने विलोमनि
र्मितं कंबलं तदुत्तिउरिसशृंगखुरं बर्बहिर्लोमप्राग्रीवं कृष्णाजिनमास्तीर्य सुवर्णशृंगं रूप्यदंतं मौ
क्तिकपुच्छं सुवर्णनाभं चतत्कृत्वा तदुपर्यासिप्रमाणं स्तिलानां संस्थाप्य वाससासंछाद्य सगंधरत्नानि
चत्वारिकांस्यघृतदुग्धदधिमधुयुतानि चत्वारि मदृश्य प्रागादिदिक्षु दानदेशाद्दहिर्मंपकरण्वामव्र
णं कुंभं च संस्थाप्य देशकालादिस्मृत्वा ब्रह्मलोकप्राप्तिकामः सप्तजन्मोपात्तपापनाशकामः पितृदृष्टु
त्रमृत्युपरिहार भार्याधनदेशाद्यवियोगकामः पुत्रयावधिस्वर्गप्राप्तिसर्वभूदानफलसमफलस र्व
लोकगतिकामो मोक्षकाम ईश्वरप्रीतिकामो वा कृष्णाजिनं करिष्य इति संकल्प्य जीर्णपीतवाससा

रामः

॥२१६॥

स्वांगानिसं मृज्य यानिपापानि काम्यानिमयालोमाहृजानिवै॥ लोहपात्रप्रदानेन प्रणश्यंतु ममा
शुचैइ तिमंत्रेणसतिलं लोहपात्रं कृष्णाजिनस्यवामे पादे॥ यानि काम्यानि पापानि कर्णोत्थानि हृता
नि वै॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदे तिमंत्रेण कांस्यं दक्षिणे परापवादयैः श्रुत्वा हृदया मांस
स्यनक्षणान्तत्रोत्थितं च मे पापं ताम्रपात्रात्प्रणश्यतु॥ इतिसतिलताम्रपात्रं वामहस्ते॥ कन्यानृतं गवां
चैव परनध र्षणं रौप्यपात्रप्रदानेन क्षिप्रं नाशं प्रयातु मइ तिमंत्रेण रौप्यपात्रं दक्षिणहस्ते जन्मजन्मस
हस्रेषु कृतं पापं कुबुद्धिना सुवर्णपात्रदानात्तन्नाशयातुजनार्दनेति साक्षतं हेमपात्रं मुध्येहेम
मुक्ताविद्रुमदाडिममातुलिंगानि संनिधाय वा माद्दि प्रशस्तपत्रे कर्णयो॥ शृंगाटकानि वरखुरेषु संस्था
प्य वस्त्रयुग्मा विनाहिताग्नि विप्रं देयद्रव्यं च संपूज्य प्रीयतां वृषभध्वज इत्यस्मादेशकालौ संकीर्त्या
मुकसगोत्रायामुकशर्मणे ब्राह्मणायतुभ्यमिदं कृष्णाजिनं कुशापरिगतं कंचलोपरिस्थितं च वस्त्रा
छादितं तिलशालि सुवर्णशृंगरौप्यखुरं प्रदंतं मुक्तालांगूलं सुवर्णनाभं पंचतुर्दिगवस्थितघृ

तद्दधिमधुघृतान्नचतुष्टयं सकांस्यपात्रं तिलप्रस्थसंपूर्णं ॥ नोह कांस्यताम्ररौप्यहैममुक्ताविद्रुम
दाडिमबीजप्रत्यत्नरत्नं गाटकयुतं शिवदैवतममुकगोत्रोऽमुकशर्मामुककामो हंसं प्रददे नम
मेति ॥ एवं दक्षिणां तु गारुडे ॥ शतनिष्कसमोपेतं तदर्द्धार्द्धमथापि वा ॥ अतो न्यूनं न दातव्यमधिके फल
मूर्जितं ॥ तत्रैव अस्पृश्यः स द्विजो राजन् चिति प्रपस्रे मोहितः ॥ दाने च श्राद्धकाले च दूरतः परिवर्जये
त् स्वगृहात्त्वपतं विप्रं मंडले स्नानमाचरेत् ॥ तद्दत्तं कुंभसहितं तत्त्याक्षेपे चतुष्पथे स्वपितृपुत्र
महरणं वियोगं नार्यपात्सह ॥ धनं देशपरित्यागं नच्चैवेह लभुयात्कचित् ॥ समग्रमन्नमिदं दानस्य फल
प्राप्नोति मानवः ॥ सर्वोद्योकांस्यवरतिका मचारा विहंगम ॥ अमृतसंभवं यावत् स्वर्गमाप्नोत्यसं
शयः ॥ इति हंसाजिनदानं तत्संयोगस्य ॥ अथ पुष्पशय्यादानं ॥ महाभारते ॥ शय्यामास्तरणोपेतां सुप्र
च्छादनसंवृतां ॥ प्रदद्यास्तु विप्राय श्रृणु तस्यापि यत्फलं ॥ सुरूपः सम भाग्यमानुषो सहस्रा मितं
वृतः ॥ दशवर्षसहस्राणि स्वर्गलोके महीयते ॥ विष्णुसंहितायं दर्पणं ॥ पादत्राणोपानानाद्ये



र्विभूषणैः ॥ चतुष्कोणेषु संस्थाप्य यथाशक्त्या युधिष्ठिर ॥ घृतकुंकुमगोधूमपूर्णपात्रं जलस्य च ॥ शा
य्यां संपूजयित्वा तु मंत्रेणानेन मत्परायणः ॥ कृतांजलिपुटो भूत्वा कुर्याच्छय्यां प्रदक्षिणां ॥ नमः प्रमाणपदेव्यै
ति प्रणम्य च चतुर्दिशं ॥ ब्राह्मणाय दरिद्राय पश्चात् अध्ययनशालिने ॥ तथात्मज्ञानविदुषे शय्यां दद्याद्वि
द्विचक्षणः ॥ फलं च तस्माद्विपुरं गच्छेत्सेव्यमानो सुरोगणैः ॥ षष्टिर्वर्षसहस्राणि क्रीडित्वा च यथा
सुखं ॥ इंद्रलोकात्परिभ्रष्ट इह लोके नृपो भवेत् ॥ षष्टियोजनविस्तीर्णे स्वामी भवति मंडले ॥ भविष्यो
त्तरे पि ॥ तस्माच्छय्यां समासाद्य सारदारुमयीं दृढं ॥ दंतपत्रचितां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलि
प्रतिच्छन्नां शुभगंडोपधानिकां ॥ प्रच्छादनपटीयुक्तां धूपगंधाधिवासितां ॥ तस्यां संस्थापयेद्धैमं
हरिं लक्ष्म्या समन्वितं ॥ उच्छीर्षके घृतभृतं कलशं परिकल्पयेत् ॥ विज्ञेयः पांडवश्रेष्ठ सनिद्राकल
शो बुधैः ॥ तांबूलकुंकुमक्षोदं कर्पूरागरुचंदनं ॥ दीपिकोपानहच्छत्रं चामरासनभोजनं ॥ पार्श्वे
षु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि ॥ शयनस्थस्य भवति यदन्यदुपकारकं ॥ भृंगारकरकाद्यं च पं

दानम०
॥२६१॥

चर्म्मवितानकं॥ शय्यामेवंविधां कृत्वा ब्राह्मणायोपपादयेत्॥ सपत्नीकाय संपूज्य पुण्ये॥ उक्तविधिपूर्व
कं॥ यथा न कृष्णशयनं शून्यं सागरजातया॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥ इति॥ अथ प्रयो
गः॥ स्वष्टदलेति स्वस्तिके तस्मिन् कृत्वा तत्र शय्यां तस्याः समंतात् संकल्पवाक्ये वक्ष्यमाणान् निकुंभादीनि
संस्थाप्य॥ उं अद्येत्यादि सर्वपापक्षयपूर्वकाप्सरोगणसेव्ययुतविमानकरणकं इंद्रपुरमनोनत्र
र षष्टिसहस्रवर्षतदधिकरणककोटनखीसहस्रसंवरणास्तितस्यालोकिमहितत्वतडत्तरषष्टि
योजनमंडलराज्यानंतरत्रिवैकपकाश्यांदास्य इति संकल्प्यपत्निकं विप्रं शय्यायां तदुपरि प्रति
मायां लक्ष्मीयुतं नारायणं संपूज्य प्रदक्षिणीकृत्य नमः प्रमाणेपि देव्येति चतुर्दिक्षु पर्णम्पतिष्याधुरुत्तेरबनं
ते सर्वपापक्षयेत्यादिकामां तं पूर्वोक्तं संकल्पवाक्यमुक्त्वा अमुकसगोत्रायामुकशर्मणे ब्राह्मणायेमां शय्यां
ईशानादिकोणचतुष्टयस्थापितघृतकुंभमगोधूमजलपूर्णपात्रामुजलपूर्णपात्रीमुच्छीर्षकप्रदेशस्था रामः
पितां घृतपूर्णकलशीं हंसतूलप्रच्छलोमसुनगेंडो धानकांप्रच्छादनपटीसप्तधान्यतांबूलादर्शकुंकु ॥७२०॥

मक्षोदकर्पूरागरुचंदनदीपिकोपानछत्रचामरासनभोजनजलपात्रपंचवर्णवितानलक्ष्मीनाराय
णप्रतिमायुतां स्वर्णगिरिदैवताममुकसगोत्रामुकशर्मणेहं संप्रददे न ममेति॥ शय्योपवेशितविप्रहस्ते
कुशोदकं क्षिपेत्॥ मंत्रः॥ यथा न कृष्णशयनं शून्यं सागरजातया॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥
ति हिरण्यदक्षिणेति शय्यादानप्रयोगः॥ हंसतूलसमायुक्तां मृद्वीं खड्गमंजंकृतां सर्वोपकरणोपेतां शिवे
शय्यां निवेशयेत्॥ शिवं देवीसमायुक्तं पेष्टकृत्वा निवेदयेदिति॥ शिवधर्मे शिवशय्यादानं॥ नंदिपुराणे
वस्त्रदानं॥ वस्त्रं यश्चार्पिनोदद्याच्छन्नं चापि यदृच्छया समवेद्धनवाश्रीमान्बृहस्पतिपुरे वसेत्॥ विष्णुधर्मो
त्तरे मासेहि सर्वदैवत्यं सर्वपायोज्यमुच्यते॥ वस्त्रदानात्सुवेषस्यात् रूपद्रविणसंयुतः॥ सुक्षौमा वणपसौ
भागे पैविरोगश्च गयाद्विजः॥ तथा॥ दत्वा कार्पासिकं वस्त्रं स्वर्गलोके महीयते॥ दत्वा सरोमं तत्रापि फलं द
शगुणं भवेत्॥ आविकं वसनं दत्वा न्द्रगुणं लोकमाप्नुयात्॥ छागं दत्वा वा गिरं ह्रीं सौमं दत्वा बृहस्पते व
स्त्रं नां लोकमाप्नोति कुशकौशेयवाससा॥ कृमिजं च तथा दत्वा सोमलोकमहीयते॥ अग्निष्टोममवाप्नो

तिदत्वैव मङ्गलोमिकां सर्ववस्त्रदः प्रोक्तो यतः सर्वत्र वस्त्रवान् अवाप्नोति वधर्मस्य तत्त्वद्दिश्यते। भविष्यपु
राणे। यो वस्त्रं नानवेदपारदहनं च महाधनं महेलिलोकमासाद्य वंद्यवंद्यस्त्रिदशैरपि। आदित्यपुरा
णे। वक्रैर्वस्त्रप्रदानेन ब्रह्मलोकं प्रपद्यते। नंदिपुराणे। वासांसि तु विचित्राणि स्नारवंति दृढंति च। स्नापि
तानि शिवे दद्यात्स कोशानि नवानि च। यावत्तद्वस्त्रतंतूनां परिमाणं विधीयते। तावद्वर्षसहस्राणि स्वर्गलो
के महीयते। स्नापितानि प्रज्ञालितानि। वाराहपुराणे। क्षौमांबराणि यो दद्यात्तानौर्णानि च चक्रके कार्पासि
जातिवाहक्को वित्तानुसारतः। तत्र वासांसि यावंतस्तंतूनां परमाणवः। तावद्वर्षसहस्राणि विष्णुलोमहा
यते। देवापुराणे। अंडजैर्वांडजैर्वापि वस्त्रैरभ्यर्च्य रोजजं संपूज्य पानरणौः त्राकूचक्रवर्तित्वमाप्नुयात्। नं
दिपुराणे। उष्णीपट्टाविनोमर्त्या जायंते कुकुटोन्चलां विस्तीर्णरजवंरोषु सितछत्राम्बलक्षणा। ना
रदीये निष्कांचनेभ्योदानेभ्यो शातवातमहातपे अर्दितेभ्यः करुणया वस्त्रमौर्णं ददाति यः। नतस्य सुकृतं
वक्तुं तं वक्तुं शक्यते त्रिदशैरपि आधिव्याधिविनिर्मुक्तःसो क्षयं सुखमश्नुते। अथ पादासनदानं। आस



नं यः प्रयच्छेत्तु सुपादैर्यैत्रो च नक्तितः। स दिव्यान् भोगसंभोगान् आरोग्यः सर्वदाश्नुते महाभारते। सत्तु दद्यां द्वि
जाग्येभ्यो नतपाचामरसुज्वलं स नृपत्वमवाप्नोति निःशेषवनिमंडलो। पद्मपुराणे। चंद्रोदयेतु यो दद्याद्ब्र
ह्मणाय छातिपुष्पुरुपधीः। न तस्य श्रेयसामंतः कदाचिदपि जायते चंद्रोदयो वितानं। अथ भाजनदानं। स्कंद
पुराणे। भाजनं यः प्रयच्छेत्तु हैमं रत्नविभूषितं। सोप्सरःशतसंकीर्णे विमाने दिवि मोदते। राजतं यः प्रय
च्छेत्तु विप्रेभ्यो भाजनं शुभं सगंधर्वपदं प्राप्य उर्वशीपासहमोदते। ताम्रं यो भाजनं दद्याद्ब्राह्मणाय विशे
षतः। स भवेद्यक्षराजस्य अनुर्बलसमन्वितः। ब्रह्मपुराणे। क्षौंडुबराणि भांडानि यो दद्याद्यसानि च। औडंब
राणि ताम्राणि महतिं च्छिमाप्नोति दुर्लभां त्रिदशैरपि। मदनरत्ने। उत्तमं पलषष्टिश्चचत्वारिंशत्तु मध्यमं
द्वादशाधमपात्रं तु ताम्रमंत्रायसंस्मृतं अत्रायसत्रा शेषाख्तु मात्र परः। वासांसि वरणे दद्यादुपवीतं सम्मा
र्यकं चंदनं चैव तांबूलं विपुलं सं पूजयेत्ततः। घृतादिद्रव्यसंपूर्णं हेमगर्भं सवस्त्रकं। प्रतिष्ठाप्य तु तत्पा
त्रं ब्राह्मणाय निवेदयेत्। ततस्तूर्णसवर्णं च प्रतिष्ठार्थं द्विजाय तु दद्यादिति शेषः। चंद्रलोके वसेत्ताव

यावद्दिनाश्चतुर्दशेति। घृतादीनि चात्र चतुर्दश। तत्रैव। घृतं च नवनीतं च दधि दुग्धं तथैव च। शर्करा गु
डतैलानि तिला मधु जलं तथा। लवणं च फलं सर्वं यावद्दलसमन्वितं। एवं चतुर्दश यतं दातव्यं विधिनान्व
येति। पाद्मे सर्वेषामेव दानानामुत्तमं पात्रमिष्यते। यथाविधि प्रदातव्यं वित्तशाठ्यविवर्जितं। अत्यंतनि
र्द्धनोसौ पि सो दद्याद्यथाविधि। चतुर्दशार्द्धमर्घं वा दद्याद्दत्तफलेप्सयेति। वाराहे। अथातः संप्रवक्ष्यामि पा
त्रदानमनुत्तमं। कृत्वा ताम्रमयं पात्रं यथाविभवविस्तरं। उभयासहितं संतुं हरिसंस्थाकमेव च। कृत्वा तु
कांचनीं दिव्यां संपूज्या वाहनादिभिः। प्रीतिमां ब्राह्मणे दद्यात्पत्रभूते विचक्षणे। अन्नैव प्रवोक्त घृतादि
चतुर्दशद्रव्याधिकान् कार्या सोपादानेन तद्द्रव्यपूर्णषोडशपात्रदानमुक्तं। अथ स्थालीदानं। भविष्यो
त्तरे। देवाताम्रमयी स्थाली पलानां पंचभिः कृतैः। अशक्तस्तु तदर्द्धेन चतुर्थांशेन वा पुनः। सर्वशक्तिवि
हीनस्तु मन्मयीमपि कारयेत्। सुगंधीरोदरां दृढदंडछकं कुंडछकराष्टेन तदर्द्धैरभिधीयते। मद्दुतं उ
त्तनिष्पन्नाक्षिन्नसारेण पूरिता। उपदंशोदकयुतां घृतपात्रसमन्वितां। कृतपार्श्वौ धौतवर्णचर्चितां चंद



नेन चास्या पमंडलके वस्त्रे पुष्पैर्धूपैरपार्चयेत्। आदित्ये हनि संक्रांतौ चतुर्दश्यष्टमीषु च। एकादश्यां तृती
यायां विप्राय प्रतिपादयेत्। ज्वलज्ज्वलनपार्श्वस्थे संतडुलैः सजलैरपि। नवेद्याज्यान्संसिद्धिर्न्न तानां पिवरी
विना। त्वं सिद्धिः सिद्धिकामानां त्वं पुष्टिः पुष्टिमिच्छतां। अतस्त्वां प्रणतो याचे सत्पुत्रं च वोमम ज्ञातिबंधुसु
हृद्वर्गं विप्रे पुस्तजने तथा। अनुकवस्तु नाम्ना यातथा जवर वरप्रद। इत्युच्चार्यत्र दद्याद्वहंडो। कादिनपुग
वे। पुष्टितुष्टिप्रदां पुंसां सर्वान्कामान्नाप्सितान्। इति स्थालीदानं। अथ पाचक दानं। तत्र सुंधुनावती
प्रतिपिप्पलादा। यद्येन पूर्वविहितं तदसौ प्राप्नुते फलं। कर्मभूमिरियं राजन्नातः शोचितुमर्हसि। तथा
न वल्लिर्यदत्तं प्राप्यं तज्जन्मनुत्तमं। मत्स्यमित्रादिसंबंधान्दत्तः प्राप्यते कुतः। इत्यादिना हेमरूप्यताम्र
निर्मितानां नानाविध भांडानां सर्वसंपत्करमापाकदानमुक्त्वा नित्यापाकदानं। अथ विद्यादानारव्यमति
दानं। तत्र पुराणदानं तावत् वाराहे। तत्संख्या। ब्राह्मं तयाम्नं वैष्णवं च शैवं भागवतं तथा। तथान्यन्नारदीयं च
मार्कंडेयं च सप्तमं। आग्नेयमष्टमं प्रोक्तं भविष्यं नवमं तथा। दशमं ब्रह्मवैवर्तं लिंगमेकादशं तथा।

दानमं०
॥२१०॥

वाराहं द्वादशं प्रोक्तं स्कांदं चात्र त्रयोदशं। चतुर्दशं वामनं च कौर्मं पंचदशं तथा। मात्स्यं च गारुडं चैव ब्रह्मां-
डमंतिमं तथा। अन्यान्युपपुराणानि सश्रीहिरण्यानि पर्वणि। लिखित्वा यः प्रयच्छेत्तु स विद्यापारगो भवेदि-
ति रामायणं भारतं च दत्वा स्वर्गे महीयते। पुराणं तर्कशास्त्रं च छंदोलंकारलक्षणं। वेदं मीमांसकं दत्वा
शिवधर्मं च चैव नृप सप्तद्वीप पृथिव्यां च राजा राजो भवेद्विभुः। तथा। धर्मशास्त्रं नरो दत्वा स्वर्गलोके म-
हीयते। अथ वेददानं। गारुडे। आम्नायरूपाणि विधाय सम्यक् हैमानि पूर्वोदित लक्षणानि। विशुद्ध-
नानामणिभूषितानि ऋग्वादिवेदक्रमतो निवेश्य। वेदरूपं महाघटे उक्तं। वासांसि देयानि यथाक्रमेण पी-
तानि शुक्लान्यथ लोहितानि। नीलानि चैवं कुसुमानि दत्वा संपूज्य गंधाक्षत धूपदीपैः। आमोदिमोदकयुतं घृ-
तपायसं च सशौद्रमन्नमथ पूपयुतं क्रमेण। तस्यो निवेद्य विधिवत्प्रयतः पुराणस्य सम्यक् प्रदक्षिणवि-
धिं विदधीत विद्वान्। तेषां पूजाविधिः कार्यो गायत्र्याधिमतां वरः। व्याहृत्या व्याहृतीः कुर्यादावाहनविसर्ज-
नो। मंत्रैरेतैस्ततः कुर्यात्तदमीषां तु मंत्रणं। ऋग्वेद पद्मपत्राक्ष रक्ष द्विपात्सु मे शरणं त्वां प्रपन्नोस्मि धे-

रामः
॥७२२॥

द्विमे हितमद्भुत। यजुर्वेद नमस्तेस्तु लोकत्राणपरायण। त्वत्प्रसादेन मे कामा निखिलाः संतु संततं। साम-
वेद महाबाहो त्वं हि साक्षादधोक्षजः। प्रसादसुमुखो भूत्वा कृपयानुगृहाण मां। अथर्ववेद सर्वभूतानां
त्वदापन्ने हिताहिते। शांतिकृत्पुष्टिदे वेशः पुष्टिमिष्टां प्रयच्छत। इति संप्रार्थ्य देवेशान् विप्रेभ्यः प्रतिपादयेतान्॥
प्रदद्यादेकमेकस्मै सुवर्णत्रिपलान्वितं। दद्यादेकपलोपेतमेकैकमिह दुर्बलः। अथ स्वशक्तितो वापि दानमे-
षां विधीयते। एतद्देवप्रमाणं स्यादेतेषां मूर्तिनिर्मितौ। अनधीतवतो देवान् वेददानविधिस्त्वयं। सदाध्यय-
नयुक्तस्य वेदाध्ययनमेव हि। इति वेददानविधिः। अथ पुस्तकदानं। भविष्ये। शास्त्रसद्भावविदुषे वाच-
के वाचके च प्रियंवदे। वस्त्रयुग्मेन संवीतं पुस्तकं प्रतिपादयेदिति। तथा। कपिलानां सहस्रेण सम्यक्-
दत्तेन यत्फलं समवाप्नोति पुस्तकैकप्रदानतः। पुराणं भारतं वापि रामायणमथापि वा। दत्वा यत्फलम-
माप्नोति पाः तत्फलं पर्वतत्केन वर्णत इति। तच्च हेमरूप्यगजदंतकाष्ठादिकृते नोर्न्यसंश्लिष्टे यंत्रेन्यस्य संपू-
ज्य देयमिति पुराणांतरे। इति पुस्तकदानं एवं त्रिविधं विद्यादानं। पुस्तकदान प्रतिमादानमध्यापनं चेति॥

दानम०

॥२७१॥

अथ छत्रोपानद्दानं ॥ पाद्मे ॥ असिपत्रवनं मार्गं क्षुरधारासमन्वितं ॥ तीव्रातपं च तरति छत्रोपानत्प्रदो नरः ॥ इति
छत्रोपानद्दानं ॥ अथान्नदानं ॥ स्कांदे ॥ अन्नं रसः प्राणदः प्रोक्तो प्राणदश्चापि सर्वदः ॥ तस्मादन्नप्रदानेन सर्व
दानफलं लभेत् ॥ इत्यन्नदानं ॥ अथ तांबूलदानं ॥ भविष्यत्पुराणे ॥ तांबूलं यो नरो दद्यात्सम्यक् नियमान्वि
तः ॥ देवेभ्यो च द्विजातिभ्यः स महाभाग्यमश्नुते ॥ इति तांबूलदानं ॥ अथ गंधद्रव्यदानं ॥ स्कांदे ॥ नरः सुवर्ण
देहत्वं गंधदानादवाप्नुयात् ॥ सौभाग्यं जायते नित्यं शरीरं नाश्यतश्च तत्प्रतिविष्णुधर्मोत्तरे ॥ सौभाग्यका
रकं प्रोक्तं प्रदानं कुंकुमस्य तु ॥ तथा कर्पूरदानेन सर्वान्कामानवाप्नुयात् ॥ मृगदर्पप्रदानेन तथा ब्राह्म्यं ब्रज
मा वृत इति गंधद्रव्यदानं ॥ लिंगे ॥ तुष्टिं वै लभते दालं पद्मं लं प्रदानात् धर्मात्प्रयोरिति नंदिपुराणे ॥ धूपदः सु
रभिस्तिग्धः पुष्पदः सुभगः स्तथोर्ते ॥ अथ रत्नदानानि ॥ जाबाली ॥ रत्नानि यो द्विजे दद्याद्बहुमूल्यानि मानवः
अलंकारनिमित्तं वा देवतास्थानियलतः ॥ संतापयात निर्मुक्तो मुक्तिमेव समश्नुते ॥ स्कांदे ॥ विद्रुमाणां प्रदा
नेन रुद्रलोकं ब्रजेन्नरः ॥ सर्वपापविनिर्मुक्तो मुक्तादानेन जायते ॥ लोकमाप्नोति दानेन नरो वज्रस्य वाज्रि राम:

॥७२४॥

ण तथा प्रदत्तो गोमेदैर्मोदते नंदने वने ॥ सर्वे ग्रहाः प्रतुष्यंति पुष्परागप्रदानतः ॥ गारुत्मतैर्गरुत्मतं निपतं
निपतं जयति श्रियः ॥ वैडूर्यैः सूर्यलोकं च पद्मरागैररोगतां ॥ प्रदानां द्विजनीलानां नीलानां नाज नेम्न वेता
सुखी शंखप्रदानेन शक्रः सुक्तिप्रदानतः ॥ इति रत्नदानं ॥ अथ गलंतिकादानं ॥ भविष्योत्तरे ॥ वसंतसमये ज्ञा
त्वा गत्वा गंदे वालयं परं ॥ शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः ॥ स्नवं तं कारयेत्कुंभमच्छिन्नदेवमस्त
के ॥ अनेन विधिना दत्वा नरो मासचतुष्टयं ॥ ततः कर्कटके प्राप्ते देवं पंचामृतेन तु संस्नाप्य पूजयेद्धूपै
नैवेद्यैश्च मनोरमैः ॥ प्रणिपत्य महेशानं मंत्रमेनमुदीरयेत् ॥ ॐ न — ॥ शंकरः शंभुर्भवो धाता शिवो हरः ॥ प्रीयतां
मे महादेवो जलकुंभप्रदानतः ॥ एवं संकल्प दातापि पश्चादागत्य वेश्मनि ॥ स्वशक्त्या शिवभक्तांश्च विप्रमु
ख्यांश्च भोजयेत् ॥ एवं यः कुरुते या भोजलदानक्रियां हरेः ॥ यावद्ब्रह्म निलिंगस्य पतिता निनसंज्ञया ॥ सव
से छांकरे लोतावत्को पो नरेश्वरेति गलंतिकादानं ॥ अथ प्रपादानं ॥ भविष्योत्तरे ॥ अतीते फाल्गुने मा
मासि प्राप्ते चैत्रमहोत्सवे ॥ पुण्ये ह्नि विप्रकथिते मंडपं कारयेत्ततः ॥ पुरस्य मध्ये पथि वा चैत्यवृक्षत

दानम०

॥१७२॥ तलेयवा सुशीलतलं रम्यं विचित्रासनसंयुतं ॥ तन्मध्ये स्थापयेद्व्यात्मणिकुंभं श्वेतो जनात् ब्राह्मणः
शीलसंपन्नो भृतिं दत्वा यथोचितं ॥ प्रपापालः प्रकर्तव्यो बहुपुत्रपरिच्छदः एवंविधां प्रपां कृत्वा शुभे
ह्नि विधिपूर्वकं यथाशक्त्यान्नरः श्रेष्ठपात्रं नियोजयो जयेद्द्विजान् ततश्चोत्सर्जयेद्दिव्यमंत्रेणानेन मानवः ॥
प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता ॥ अस्याः प्रदानात् पितरस्तृप्यंतु प्रतिपितामहाः ॥ अनिवारितं ततो
देयं जलं मासचतुष्टयं ॥ त्रिपक्षं वा महाराजजीवानां जीवनं परं ॥ प्रत्यहं कारयेत्तस्य भोजनं शक्तितो द्विजान्
अनेन विधिना यस्तु ग्रीष्मे जायप्रपां प नौ पानीयमुत्तमं दद्यात्तस्य पुण्यफलं शृणु ॥ कपिलाशतदानस्य
सम्यक् दत्तस्य यत्फलं ॥ तत्पुण्यफलमाप्नोति सर्वदेवैः सुपूजित ॥ पूर्णचंद्रप्रतीकाशं विमानमधिरुह्य
स याति देवेंद्रनगरं ॥ पूज्यमानो सुरोगणैः ॥ त्रिरात्के यो हि वर्षाणां प्रजांगंधर्वसेवित ॥ पुण्यक्षयादिहाग
त्य चतुर्वेदी द्विजो भवेत् ततः परं पदं याति पुनरावृत्तिदुर्लभं इतिप्रपामितिप्रमितिप्रदानं ॥ अथोदकदानं
स्कंदपुराणे ॥ त्रयाणामपि लोकानामुदकं जीवनं स्मृतं ॥ पवित्रं ममृतं यस्मात्तद्देयं पुण्यमिच्छता रामः

॥७२५॥

भविष्यपुराणे ॥ ग्रीष्मे चैव वसंते च पानीयं यः प्रयच्छति ॥ वक्तुं जिह्वासहस्रेण तस्य पुण्यं न शक्यते ॥ नंदिपुरा
णे योपि कश्चिन्मनुष्याः स्वीयजलपानं प्रयच्छति ॥ स नित्यं तृप्तो भवति स्वर्गे युगशतं नरः ॥ गरुडपुराणे ॥ मूल्
ल्येन कृत्वा धर्मार्थे जलदानं प्रयच्छति ॥ स याति विंद्रसालोकं शुभ्नमालांशुकावृत ॥ दोरुकुंभास्तु मायां ति
तथार्यातिमक्षश्रवाः घृतदधुदकास्तस्य समुद्भावन्नावरोवर्त्तिनि ॥ देवलः ॥ सेतायां पश्चिमे विप्रे प्रद
र्घकरपत्रिकां ॥ फलं सकूपरवातस्य नूनमाप्नोति मानवः ॥ महाभारते ॥ पिपासया न म्रियते सोपच्छं
दश्च जायते ॥ नैवासुपाह्युपसनंकर कान्यः प्रयच्छति ॥ आदित्यपुराणे यो ददाति घटीमात्रं कुंडिकां का
रकां तथा तृषार्त्तस्य तथा धर्मेण भवेत् शीतलं जलं ॥ अथ धर्मघटदानं ॥ विष्णु ॥ शीतलेन सुगंधेन वा
रिणा पूरितं घटं शुक्लचंदनदिग्धांगं पुष्पदामोपशोभितं ॥ दध्योदनभूतं कुर्याच्छरावं तस्य पारि ॥ उ
पानच्छत्रसंयुक्तं धर्मार्थं कल्पयेद्घटं ॥ पुष्पाक्षतं गृहीत्वा तु इमं मंत्रमुदीरयेत् ॥ ॐ नमो विष्णुरूपाय नमः
सागरसंभव ॥ अपां पूर्णोद्धरास्मांस्त्वं दुःखसंसारसागरात् ॥ उदकुंभो मया दत्तो ग्रीष्मकाले दिने ॥ ॐ दिकुं

नेऽउदकुंभप्रदानेन प्रीयतां मधुसूदनः ॥ भविष्योत्तरे ॥ घृतसहं धर्मघटको वस्त्रसंवेष्टितो नवः ॥ ब्राह्मणाय प्रहेदे
यः शीतामलजलः शुचिः ॥ वसंतग्रीष्मयोर्मध्ये यः पानीयं प्रयच्छति ॥ पलेपले सुवर्णस्य फलमाप्नोति मा
नवः ॥ मार्गशीर्षात्समारभ्य उदकुंभं तु यः क्षिपेत् ॥ दिने दिने सहस्रस्य गवां पुण्यफलं लभेत् ॥ तस्मैवोद्या
पनं कार्यमास्ति मासि नरोत्तम ॥ मंडकावेष्टका निष्कपक्वा सैसार्वकामिकैः ॥ उद्दिश्य शंकरं विष्णुं ब्राह्म
णमथवा पितॄन् ॥ सतिलं शोधयित्वा तु मंत्रेणानेन मानवः ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः ॥
अस्य प्रदानात्सततं मम संतु मनोरथाः ॥ अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति ॥ वसंतग्रीष्मौ समये गोप्रदा
नफलं लभेत् ॥ इति धर्मघटदानं ॥ बौधायनः ॥ यज्ञोपवीतदानेन जायते ब्रह्मवर्चसी ॥ तस्मात्तानि प्रदेया
नि ब्राह्मणेभ्यो विपश्चिता ॥ अत्र ॥ क्षौमजं वाथ कार्पासं पट्टसूत्रमयापि वा ॥ यज्ञोपवीतं यो दद्याद्वृत
वर्णसुशोभनं ॥ यथाशास्त्रविधानेन अग्निष्टोमफलं लभेत् ॥ नंदिपुराणे ॥ यज्ञोपवीतदानेन सुरेभ्यो ब्रा
ह्मणाय यथा ॥ भवेद्द्विजचतुर्वेदः शुद्धधानां न संशयः विष्णुप्रोक्ते ॥ उपाकर्मणि विप्रेभ्यो दद्याद्यज्ञोपवी



तकं ॥ आयुष्मान् जायते नकर्मणा मानवो भुवि ॥ अथ यष्टिदानं ॥ यष्टिं ये प्रयच्छंति नेत्रहीनेषु दुर्बले
तेषां सुविपुलं प्राप्य फलमत्र लोपशोभितः ॥ ब्राह्मणे वैव वृद्धेये पंगुभ्यश्चापायेभ्यो दीनेभ्योपि दद्याद्यष्टि
यष्टिदानं प्रकुर्वंति निरोगास्ते न संशयः ॥ पंगोश्चरणकायाणि यष्टिः प्रकुरुते सदा ॥ गोसर्पादिनि
हति अजायते यष्टिधारणात् ॥ भीतानां शरणं यष्टिर्गच्छतां निशि चाटवे ॥ शंकापंकाद्विवाती छान्नियमेन
निरस्यते ॥ स्कंदपुराणे ॥ यतिभ्यो वैणवं दंडं द्विजेभ्योपि खदिरकं ॥ प्रदाय परलोके सौ यमदंडं न गच्छति
प्रदद्यातिथये वर्णिने दंडं ब्रह्मचारिणे ॥ समग्रपुरुषो लोके ब्रह्मवर्चसमश्नुते ॥ अथेंधनदानं ॥ यइं
धनानि काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ॥ सर्वार्थास्तस्य सिध्यंति तेजस्वी चापि जायते ॥ हेमंते शिशिरे चैव
पुण्यो ग्निर्यः प्रयच्छति ॥ सर्वलोकप्रतापार्थं पुण्यं पागतिमवाप्नुयात् ॥ यम ॥ इंधनानां प्रदानेन दीप्ताग्निस्तु
विजायते ॥ महाभारते ॥ यश्चेंधनार्थं काष्ठानि ब्राह्मणेभ्यः प्रयच्छति ॥ प्रजापनार्थं राजेंद्र प्रवृत्ते शिशिरे नरः ॥
॥ सिध्यंत्यथाः सदा तस्य कार्याणि त्रिविधानि च ॥ उपर्युपरि शत्रूणां चतुष्पादापते नरः ॥ भगवांश्चास्य सुप्रीते

दानम॰
॥२७५॥

वह्निर्भवति नित्यशः ॥ न तत्त्यजंति यम्राघः संग्रामेषु जयस्य विपि ॥ अथाग्निष्टिकादानं भविष्योत्तरे ॥ आदौ
मार्गशिरे मासि शिवे भनेद्दिवसे शुभे ॥ अग्निष्टिकां कारयित्वा सुरवासनवतीद्दृढां ॥ देवागारे मठे हट्टे वित्तशैचित्य
रेतया ॥ उभयोः संध्ययोः कृत्वा समुद्धं काष्ठसंचयं ॥ ततः प्रज्वालयेदग्निं हुत्वा व्याहृतिभिः क्रमात् ॥ ब्राह्मणा
न्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणां ॥ अनेन विधिना कृत्वा प्रत्यहं ज्वालयेन्नतः ॥ यदि किंचित्तु धान्तैः
स्यात् भोजनं तस्य कल्पयेत् ॥ उद्दिष्टेत्यादिहेमंत शिशिराख्यमृतुद्वयं ॥ यावत्तावत्तस्य देशे तावत्प्राणिताप
नार्थं इमामग्निष्टिकां कृत्वा दैवतां षष्टिसहस्रषष्टिशात ॥ ब्रवष्टिन्न ब्रह्मलोकमहितत्वानंतरसर्वार्थसंपन्नश्च
तुर्वेदित्वप्राप्तिका भोक्तृमुक्तजन्मे ॥ अस्य दानस्य फलमपि तत्रैव मानेचार्कसंकाशे समारूढो महामते ॥ षष्टि
वर्षसहस्राणि षष्टिवर्षशतानि च ॥ अर्पितो तं ततसंतुष्टो ब्रह्मलोके महीपते ॥ इहलोके वतीर्णश्च तु वेदो
द्विजो भवेत् ॥ नीरुजः सत्यवादी च अग्नितेजाः प्रभावतः ॥ चैत्रे सुराजयस भावसयेषु भक्त्यं ये अग्निष्टिकां प्रद्यु
रकाष्ठवतीं प्रदद्युः ॥ हेमंतशैशिरऋतौ सुरवदां जनानां कायाग्नि दीप्तममलं वपुरावहंति ॥ अथ दीपदानं रामः

॥७२१

मं वर्षं ॥ देवागारे द्विजानां वा दीपं दत्त्वा चतुष्पथे मेधावी ज्ञानसंपन्नश्चक्षुष्मांश्च सदा भवेत् ॥ गरुडपुराणे ॥ नील
कं वस्य मोक्षेण गगायां च तिलोदकैः ॥ वर्षासु दीपदानेन पितृणामनृणो भवेत् ॥ नीलकं वस्य मोक्षेणनी
लवृषोत्सर्गः ॥ यस्तु ब्राह्मणगेहेषु दीपमालां प्रयच्छति स निर्जित्य तमो घोरं ज्योतिषां लोकमाप्नुयात् ॥
महाभारते ॥ दीपप्रदानं वक्ष्यामि फलयोगमनुत्तमं ॥ यथायेन यदा चैवमदेयाद्दशाश्चते ॥ ज्योतिस्तेजः
प्रकाशं वाप्यूर्ध्वगत्यापि वर्ण्यते ॥ प्रदानं तेजसां तस्मात्तेजो वर्द्धयते नृणां ॥ अंधं तमस्तामिस्रं च दक्षिणायन
मेव च ॥ उत्तरायनमेतस्माद्दीपदानं प्रशस्यते ॥ यस्मादूर्ध्वंगतेस्तत्तु तमसश्चैव भेषजं ॥ तस्मादूर्ध्वगतति
र्दाता भवेत्तेनेति विश्वयः ॥ विष्णुधर्मोत्तरे ॥ महावर्त्तिः सदा देया भूमिपाल महाफला ॥ कृष्णपक्षे विशेषेण
तत्रापि च विशेषतः ॥ अमावास्या विनिर्दिष्टा द्वादशी च महाफला ॥ आश्वयुज्यामतीतायां कृष्णपक्षस्य या भवे
त् ॥ अमावास्या तदा पुण्या द्वादशी च विशेषतः ॥ देवस्य दक्षिणे पार्श्वे देया तैलतुलान्नप ॥ पलाष्टकयुतारा
ज नववर्त्तिं तन्त्रैवदापयेत् ॥ वाससा तु समर्प्पेण सोपवासो जितेंद्रियः ॥ महावर्त्तिद्वयमिदं संकल्प्य तामहीप

ते गिरिशृंगेषु दातव्यं नदीपुलिनेषु च। चतुष्पथेषु रथ्यासु ब्राह्मणानां च वेश्मसु। वृक्षमूलेषु गोष्ठेषु कांता
रगहनेषु च। दीपदानेन सर्वत्र महत्फलमुपाश्नुते। यावंत्यक्षिनिमेषाणि दीपः प्रज्वलते नृप। तावंति वर्ष
राजेंद्र वर्षाणि दिवि मोदते। दीपदानेन राजेंद्र चक्षुष्मानिह जायते। रूपसौभाग्ययुक्तश्च धनधान्यसम
न्वितः। अथ पानीयदाने संवर्तः। भूतानीयप्रदानेन सर्वान्कामानवाप्नुयात्। दीर्घमायुश्च लभते सदा च सुतोभ
वेत्। रामायणे। बद्धांजलिपुटं दीनं याचंतमपराजितं। न हन्याच्छरणं प्राप्तं सतां धर्ममनुस्मरन्। महाभारते
लोभाद्वेषाद्भयाद्वापि यस्त्यजेच्छरणागतं। ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः। अथ मासेषु दानानि। वि
ष्णुधर्मोत्तरे। तिलप्रदानान्माघे तु याम्यलोकं न पश्यति। प्रियंगुं फाल्गुने दत्वा प्रियो भवति भूतले। चैत्रे चि
त्राणि वस्त्राणि दत्वा सौभाग्यमश्नुते। अपूपानां प्रदानेन वैशाखे स्वर्गमश्नुते। छत्रदानं तथा ज्येष्ठे सर्वान्का
मानमश्नुते। आषाढे चंदनं देयं सकर्पूरं महाफलं। श्रावणे वस्त्रदानस्य कीर्तितं सुमहत्फलं। प्रौष्ठपदे त राम०
था मासे प्रदानात्फाणितस्य च। आश्विने घृतदानेन रूपवानभिजायते। कार्त्तिके दीपदानेन सर्वथोज्व ॥७२६॥

लमाप्नुयात्। लवणं मार्गशीर्षे तु दत्वा सौभाग्यमश्नुते। पौषे कांचनदानेन न परं तुष्टितये वचः। पुष्पाणां च
सिते पक्षे दानं लक्ष्म्याकरं मतं। फलानां च तथा दानं कृष्णपक्षे महाफलं। अथ पथ्यदाने वचनं। भविष्योत्तरे
उदकुंभप्रदोपि च शक्तो यः पुमान्भवेत्। तेनाश्वत्थतरोर्मूले सेव्यं नित्यं जितात्मना। सर्वपापप्रशमनं सर्व
दुःखघ्ननाशनं। सर्वरोगप्रशमनं नित्यं संततिवर्द्धनं। अश्वत्थरूपी भगवान्प्रीयतां मे जनार्दनः। इ
त्युच्चार्य नमस्कृत्य प्रत्यहं पापनाशनं। यः करोति तरोर्मूले सेकं मासचतुष्टयं। सोपि तत्फलमाप्नो
ति रेषा सनातनीति। इत्यश्वत्थसेचनं। अथ पथ्योपचारः। गारुडपुराणे। यो यं परिचरेद्भक्त्या शयना
सनभोजनैः। स स्वल्पेन प्रयासेन जयति क्रतुयाजिनं। दत्वा वासोपि वस्त्रादि रोगिणो रुक्प्रतिक्रियं। तृषा
र्त्ताय जलं दत्वा मृष्टमन्नं बुभुक्षवे। पथिकाय प्रपावित्तं सर्वं तरति दुष्कृतं। अथ वत्समनुमानापिरा।
कन्दमूलफलैर्जलैः। सत्कृत्य कृत्सवाचापि श्रेयसो भाजनं भवेत्। तथा स्वभावेष्टणान्नं संबुपत्रं धन
फलानि च। दत्वा गतामनिर्विलासः स्वर्गं याति प्रियेण वै। विष्णुधर्मोत्तरे। उपानन्मांचछत्रेण श्रांते

दानम॰
१७६

संयोज्यमानवसंस्थाप्य सुन्देशेतु ज्ञणाद्वक्षफलं नवेत्। तथाम्लत्येनवासपिपष्टमारं विचक्षणः। अश्व
मेधस्य यज्ञस्य फलं दशगुणं भवेत्। तथा चौरेभ्यो रक्षणं कृत्वा शक्रलोके महीयते। स्कांदे। यस्तु श्रां
मार्गपरिश्रांतं द्विजातिं यामकर्षितं। तैलेनाभ्यंजयेत्तावान्सम्सुखमोदते चिरं। सर्वेषां कपिलाधेनोरथ
वान्येन सर्पिषा। उद्वरायुणमासाद्य यो भ्यंजयति धूर्जटिं। महापूजा घृतेनैव तस्मिन्नेव दिने शिवे। कृ
त्वा मनुष्यो लभते राज्यं निष्पालभते राज्यं निहतकंटकं। सर्पिःपलसहस्रेण गोविंदस्यापि वस्य चामहा
स्नानं नरः कृत्वा ब्रह्महत्यां तरिष्यति। नंदिपुराणे। पादाभ्यंगं तु यो दद्यात्पापाय परिखेदिने। सम्तु मान्नरो
ः पादैवं द्विनिर्नित्यं वदित। भवेन्नृपो महानागो मंडले दशयोजने। संवाह्य। ध्वपरिश्रांतं पादाभ्यंगादि
नानरः। धर्मस्य तु रमाप्नोति सर्वकामगुणोज्वलः। दत्वा वारि तु संस्पर्शं पादाभ्यां च द्विजातये। उच्छिष्टमार्ज
नाच्चापि गोदानफलमश्नुते। भविष्यपुराणे। ब्राह्मणस्य तु यो भक्त्या पादौ प्रक्षाल्य शक्तितः। घृतेनाभ्यु
ज्य पादौ तु विष्णुलोके महीयते। इति पाद्योपचारः। अथ गोपरिचर्या। विष्णुः। गवां कंडूयनं चैव

दानम॰
७२९

सर्वकल्मषनाशनं। गवां ग्रासप्रदानेन स्वर्गलोके महीयते। आदित्यपुराणे। लवणं च यथाशक्त्या ग
वां यो वै ददाति च। तेषां पुरा प्रकृतां श्लोकां गवां लोकां व्रजंति ते। महाभारते। कृत्वा गवार्थे शरणं शी
तवातत्राणमं महत्। आसप्तमं तारयति कुलं भरतसत्तम। दरीतो। द्वौ मासौ पायसेद्वत्संस्त्रीयेद्विस्त
नं उहेत। चतुर्थे त्रिस्तनं चैव यथान्यायं यथाबलं। ब्रह्मपुराणे। आहो विचार्य वयसः परिमाणं बलं
रुचिं। आकस्मिकं तु दातव्यं पुण्यपार्थं तु गवाह्निकं। विष्णुधर्मोत्तरे। गवां कंडूयनं चैव सर्वकिल्मषना
शनं। तासां शृंगोदकं नाम जाह्नवीजलसन्निभं। तथा। दत्वा परगवे ग्रासं पुण्यपुंसमहेद्धांपात्। त्रि
शिरं सकलं कालं ग्रासं परगवे तथा। दत्वा स्वर्गमवाप्नोति संवत्सरशतानि षट्। अयमन्नं नरो दद्या
न्नित्यमेव तथा गवां। मासाष्टकेन लभते नाकलोकं समाप्नुते। सार्धं प्रातर्मनुष्याणामशनं स्मृतिनिर्मितं
तत्रैकमशनं दत्वा गवां नित्यमतंद्रितः। द्वितीयं यः समश्नाति तेन संवत्सरं नरः। गवां लोकमवाप्नोति
यावमन्वंतरं द्विज। शीतत्राणं गवां कृत्वा गृहे पुरुषसत्तम गवां लोकमवाप्नोति यावदिंद्राश्चतुर्दश

दानम०

॥१७७॥ ॥ गवां प्रपाने पानीयं कृत्वा पुरुषसत्तम॥ वारुणं लोकमाप्नोति कीर्त्युत्पत्तिगणायुतं॥ तथा॥ सिंहव्याघ्रभयत्रस्तां
पंकलग्नां जलेगतां॥ गां तु धृत्वा नरः स्वर्गे किल्पं भोगानुपाश्नुते॥ तासां सम्पर्शनं धान्यं सर्वकल्मषनाशनं
दानेन च तथा तासां कुलान्यपि समुद्धरेत्॥ उदकात्मतिकादोषेनैव तत्र गृहे भवेदिति गोपरिचर्या॥ स्व
धान्यानां द्रव्यदानमंत्रा॥ हेमाद्रौ व्रतखंडे॥ धान्यं करोति दातारमिह लोके परत्र च॥ तस्मात्प्रदीयते धान्य म
नः शांतिं प्रयच्छ मे॥ धान्यस्य॥ अन्नेन जायते विश्वं प्राणिनां प्राणरक्षणं॥ तंदुलाः वैश्वदेवत्याः पाके नान्नं भवंति
ये पावनाः सर्वयज्ञेषु प्रशस्ता होमकर्मणि॥ तस्मात्तंदुलदानेन प्रीयतां विश्वदेवता॥ तंदुलानां॥ तस्माद्त्र
मयाजं ब्रह्मदीपे गोधूमसंभवा॥ गंधर्वसौख्यधन ह्यतः शांतिं प्रयच्छ मे॥ गोधूमानां॥ धान्यराजाश्च मांगल्या
द्विजप्रीतिकरा यवाः॥ तस्मादेषां प्रदानेन मम सांत्वभिमतं फलं॥ यवानां॥ मुद्गबीजानि वै यस्मात्त्रिया
णि परमेष्ठिनः॥ तस्मादेषां प्रदानेन प्रीतिः सिध्यतु मे सदा॥ मुद्गानां॥ यस्मान्मधुघ्नकाले विष्णुदेहसमुद्भवा रामः
पितृप्रीतिकरा माषा अतः शांतिं प्रयच्छ मे॥ माषानां॥ पुरा गोवर्द्धनोद्धारसमये ये हरिच्युता चणकाः सर्वपा ॥७३०

पघ्ना अतः शांतिं प्रयच्छ मे॥ चणकानां॥ अग्निवर्णो द्रवानाम बलकीर्त्ति प्रवर्द्धनाः॥ कुलस्था सर्वपापघ्ना
अतः शांतिं प्रयच्छ मे कुलत्थानां॥ तिला पापहराः नित्यं विष्णोर्देहसमुद्भवाः॥ तिलदानेन सर्वं मे पापं नाशय
केशव॥ तिलानां॥ तिलाः स्वर्णसमायुक्ता दुरितः क्षयकारकाः॥ विष्णुप्रीतिकरा नित्यमतः शांतिं प्रयच्छ मे
स्वर्णतिलानां॥ तिलाः पुण्याः पवित्राश्च सर्वकामकराः शुभाः॥ शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः॥
यानि कानि च पापानि ब्रह्महत्यासमानि च॥ तिलपात्रप्रदानेन तानि नश्यंतु मे सदा॥ सहिरण्यतिलपात्रस्य
देवदेव जगन्नाथ वांछितार्थफलप्रद॥ तिलपात्रं प्रदास्यामि सर्वांगे संस्थितेरहं॥ स्वर्णादितिलपात्रस्य॥ अ
न्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः॥ अन्नं ब्रह्माखिलत्राणं अस्तु मे जन्मजन्मनि॥ अन्नस्य॥ चंद्रमंडलमध्य
स्थं च शंबुजसमप्रभं॥ दध्यन्नं तस्य दानेन प्रीयतां वामनो मम॥ दध्यन्नस्य॥ दध्यन्नं सोपदंशं च ब्रह्मविष्णु
शिवात्मकं॥ प्रीयतां धर्मराजो हि तद्दानात्प्रसर्वदा॥ सोपदंशदध्यन्नस्य॥ पानीयसहितं चैव सदध्योदन
पात्रकं॥ समर्चितं च सफलं सदक्षिणं गृहाण मे॥ सपानीयदध्यन्नस्य॥ सर्वात्मा सर्वलोकेशः सर्वव्यापी सना

दानम०
॥२७८॥ तनः नारायणः प्रसन्नस्स्यात् कृशरान्नप्रदानतः॥ कृशरान्नस्य॥ पायसं परमान्नं सर्वदेवनोत्तमोत्तमं सर्वदे
वतयोप्यं च श्रेयः पुष्टिं प्रयच्छतु॥ पायसान्नस्य॥ केदारवप्रीतिदा भक्ष्या रंतु ब्रह्मार्कतुष्टिदा॥ घृतयुग्विधा
पूपकाद्याः यच्छंतु बलमारोग्यमेव मे भक्ष्याणां॥ आदित्यतेजसोत्पन्नाः सर्वमंगलकारकाः॥ मंडकाः सर्वपापघ्ना
आनः शांतिं प्रयच्छमा॥ मंडकानां॥ आदित्यतेजसा भक्तं शांतिश्रेष्ठकरं परं॥ दत्तं त्वं मम विघ्नं त्वं प्रतीच्छा
पूपमुत्तमं॥ अपूपान्नस्य॥ प्रजापत्या यतः प्रोक्ताः सक्तवो यज्ञकर्मणि॥ तस्मात्सक्तून्प्रयच्छामि प्रीयतां मे प्र
जापतिः सक्तूनां॥ अन्नं ब्रह्मामरणां नित्यं नित्यं सौभाग्यवर्द्धनं॥ क्षीरं मंगलमायुष्यमतः शांतिं प्रयच्छमे
दुग्धस्य॥ कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परं॥ नवनीतं प्रदास्यामि बलं पुष्टिं च देहि मे॥ नवनीतस्य
कामधेनोः समुद्भूतं देवानामुत्तमं हविः॥ आयुर्धिवर्द्धनं दातुराज्यं पातु सदैव मां॥ आज्यस्य॥ लक्ष्मीर्य
क्षमे दौस्थ्यं सर्वगोत्रेष्ववस्थितं तत्सर्वं शमयाज्य त्वं लक्ष्मीं पुष्टिं च वर्द्धय॥ आरोग्यपार्थाज्यस्य॥ आज्येन राम:
समुद्दिष्टं आज्यं पापहरं स्मृतं॥ आज्यं सुराणामाहारा आज्ये दोषाः प्रतिष्ठिताः॥ पापक्षयार्थाज्यस्य॥ तौलं पु ॥७३॥

ष्टिकरं नित्यं आयुष्यं पापनाशनं॥ अमांगल्यहरं पुण्यं मतः शांतिं प्रयच्छमे॥ तैलस्य॥ अमृतस्य कुलोत्प
न्नाऽक्षुधारा तिशर्करा॥ सूर्यप्रीतिकरा नित्यं मतः शांतिं प्रयच्छमे॥ शर्करायाः॥ मनोभवधनुर्मध्या
दुद्धृता शर्करा इति॥ तस्मादस्य प्रदानेन मम संतु मनोरथाः॥ खंडस्य॥ प्रणवः सर्वमंत्राणां नारीणां पार्व
तीयथा॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः॥ मम तस्मात्परां शांतिं ददस्व गुड सर्वदा॥ गुडस्य॥ इक्षुदंडं महापु
ण्यं रसात्मं सर्वकामदं॥ नदस्वं दास्यामि तेनाप्तु प्रीयतां परमेश्वरः॥ इक्षोः॥ यस्मात्तिष्ठणाऽप्लादेवं पीतं मधुमतो
द्भवं॥ तस्मात्तव प्रदानेन रक्ष मां दुःखसागरात्॥ मधुनः॥ वारिपूर्णघटोपेतं देवत्रयमयं यजः॥ प्रीयतां धर्मरा
जस्तु दानेनानेन पुष्पदः॥ उदकुंभस्य॥ यमामनंति विश्वेशं विश्वनाथमुमासुतं॥ विघ्नेश्वरं क्षिप्रचरं तुभ्यं
दास्याम्यभीष्टदं॥ गणेशप्रतिमायाः॥ ददामि भानुं भवते सवत्सं सर्वोपस्करसंयुतं॥ मनोभिलषितामाति
करोतु मम भास्करः॥ सूर्यमूर्त्तेः॥ त्वया सुराणाममृतं विहाय पुरा हृतं संहृतमेव यस्मात्॥ तथा सुराणां
त्रिपुरं च दग्धमेकेषुणा लोकहितार्थमाशा॥ त्वद्रूपदानादहमप्यदोषै विमुक्तगुणान्प्रपद्ये॥ तथा

दानम०
॥१७९॥

कृतं त्वं शरणं प्रपद्येमपि प्रभो देव वरप्रसादं ॥ शिवमूर्त्तेः ॥ प्रसादं तु भवो नित्यं कृत्तिवासा महेश्वरः ॥ पार्वत्यास हि
तो देवो जगदुत्पत्तिकारकः ॥ उमामहेश्वरयोः ॥ शिवशक्त्यात्मकं यस्माज्जगदेतच्चराचरं ॥ तस्मादनेन
सर्वं मे करोतु भगवान् शिवः ॥ कैलाशवासी गौरीशो भगवान् भगनेत्रभित् ॥ चराचरात्मको लिंगरूपी ॥
दिशतु वांछितं ॥ लिंगस्य ॥ इदं मारकतं लिंगं रौप्यपीठसमन्वितं धाम्यै द्वादशभिर्युक्तं एकादशफलान्वितं
संप्रदद्यां विधानेन यथोक्तं फलमस्तु मे ॥ मरकतलिंगस्य ॥ काश्मीरलिंगपद्ये तु इदं काश्मीरजमिति वदेत्
महाकोशनिवासेन चक्रादौ रूपशोभितं ॥ अस्य देवप्रदानात्तु मम संतु मनोरथाः ॥ शालग्रामस्य ॥ महाको
शनिवासस्त्वं महादेवो महेश्वरः ॥ प्रीयतां तव दानेन ततः शांतिं प्रयच्छ मे ॥ शिवनाभस्य ॥ शंकुकर्णप्र
लंबोष्ठं लंबभ्रूदीर्घनासिकः ॥ अष्टनेत्रचतुर्वक्त्रविस्तीर्णं शतयोजनं ॥ व्यतीपात नमस्तेऽस्तु सोमसूर्ययोस्तु
तप्रभो ॥ यद्दानानि कृतं किंचिन्नरस्तस्याप्यमितास्तु मे ॥ व्यतीपातस्य ॥ विधुंतुद नमस्तेऽस्तु सिंहिकानंदनाव्यय दा
नेनानेन नागस्य रक्ष मां वेधजाद्भयात् ॥ स्वर्णनागस्य ॥ जन्मांतरसहस्रेषु यत्कृतं दुरितं मया ॥ स्वर्णपा रामः
॥७३२॥

त्रप्रदानेन शांतिरस्तु सदा मम ॥ स्वर्णपात्रस्य ॥ त्वदुद्भवो जगत्स्रष्टुर्वेधसो हेमपंकज ॥ पद्मावास हरेर्नाभि
जात मां पाहि सर्वदा ॥ स्वर्णपद्मस्य ॥ कांतारवनदुर्गेषु चौरव्यालाकुलेषु च ॥ सिंहकाध्वन हिंसंतु सिंहदा
नप्रभावतः ॥ स्वर्णसिंहस्य ॥ हिरण्यगर्भसंभूतं सौवर्णं चांगुलीयकं ॥ धर्मं प्रदेयं यच्छामि प्रीयतां कमलापतिः
॥ अंगुलीयस्य ॥ कांचनं हस्तवलयं रूपकांतिसुखप्रदं ॥ विभूषणं प्रदास्यामि विभूषयतु मां सदा ॥ वलय
स्य ॥ क्षीरोदमथने पूर्वमुद्धृतं कुंडलद्वयं ॥ श्रियासह समुद्भूतं ददेऽस्मात्प्रीयतां मम ॥ कुंडलस्य ॥ अगम्यागमनं चै
व परदाराभिमर्शनं ॥ रौप्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ रौप्यपात्रस्य ॥ असुरेषु समुद्भूतं रजतं पितृवल्ल
भं ॥ तस्मादस्य प्रसादेन रुद्रः संप्रीयतां मम ॥ रजतस्य ॥ परापवादपैशून्यादभक्षस्य च भक्षणात् ॥ तत्र जातं च य
त्पापं ताम्रपात्रात्प्रणश्यतु ॥ ताम्रपात्रस्य ॥ यानि पापानि काम्यानि कामोत्कृतानि च ॥ कांस्यपात्रप्रदा
नेन तानि नश्यंतु मे सदा ॥ कांस्यपात्रस्य ॥ यानि पापान्यनेकानि मया कामकृतानि च ॥ लोहपात्रप्रदानेन ता
नि नश्यंतु सर्वदा ॥ लोहपात्रस्य ॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ॥ तथा शांतिं प्रयच्छंतु रत्नदानेन

मे सुराः रत्नसंभवाः । ताम्रपर्णपर्वतोत्पन्ना वर्णाद्याकस्य वर्णिता । मुक्ताः शुक्तसमुद्भवा संतु भक्तिमुक्तिप्रदा मम मुक्तासं
त्रा । यथा भूमिप्रदानस्य कलां नार्हंति षोडशीं । दानान्यन्यानि मे रूप्यं तिष्ठं मि दानाद्भवत्विह भुवः सर्वभूताश्र
या भूमि वराहेण समुद्धृता । अनंतस्य फलं दा अतः शांतिं प्रयच्छ मे । सशस्य भूमेः । स दारोहंति बीजानि काल
स्पृष्टे महीतले तव प्रदानात्सकलाम मम संतु मनोरथाः । कृष्णजिनस्य । इदं गृहं गृहाण त्वं सर्वोपस्कर संयुतं तव
विप्र प्रसादेन ममास्त्वभिमतं फलं । गृहस्य । समाश्रियं प्रयच्छामि प्रियतां मे जगन्निधिः । आश्रमस्य । गवामं
गेषु तिष्ठंति भुवनानि चतुर्दश यस्मात्तस्माच्छिवं मे स्यादिहलोके परत्र च । गो । यमद्वारे महाघोरे या सा वैतर
णी नदी । तां तर्तुकामो यच्छामि तन्नार यमुरवेन मां वैतरण्या । यस्मात्त्वं पृथिवी सर्वा धेनुर्वै केशवसन्निभा ।
सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे । कृष्णधेनोः । मत्स्युत्कृतौ चक्रमत्स्यसुरवेष्टितं तिविष्टद्वये तुभ्यं संप्र
ददे नाम्ना गोसमुत्कांति संज्ञितां । चंद्रादिलोकपालानां या राजमहिषी शुभा । महिषीदानमहात्म्यात्सा
स्तु मे सर्वकामदा । धर्मराजस्य महात्म्ये यस्याः पुत्रः प्रतिष्ठितः । महिषासुरस्य जननी यात्तु मे सर्वका



मदा महिष्याः । महिषीं वत्ससंयुक्तां सुशीलां च पयस्विनीं । रक्तवस्त्रेण पुष्पेण दत्त्वाभ्यर्च्य जयेन्नरः । महिम
हिष्या वाहन । कोपनमितं यत्किंचित्सम उद्धृतं तत्सर्वं विलयं यातु त्वद्दानात्सेवितं । मेष्या । रोमत्वचां
समजाद्यैः सर्वेपिक ऋणैः सदा जगतः संप्रवृत्तो सित्वामतः प्रार्थये शिवं । मेषस्य । देवानां यो मुखं वह्नेय
वाहनः सर्वपूजितः । त्वं तस्य त्वं वाहनं भूत्वं देवैः सेव्यैर्महर्षिभिः । प्रतिमाद्यं पूर्वकर्मविपाकोत्थं तु यन्मम
तत्सर्वं नाशयद्विप्रेज वराग्निं विवर्द्धय । मेषस्य । त्वं पूर्वं ब्रह्मणा सृष्टा पवित्रं भवती परा । त्वस्त्रस्तौ
स्थिताय ज्ञास्तस्माच्छांतिकदा भव । अजामंत्र । गौरीकन्यामिमां मंत्र यथाशक्तिविभूषितां । गोत्राय पुत्रा
र्मणे तुभ्यं दत्तां विप्र समाश्रय । कन्यायाः । इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता । तदा कर्मकरि भोग्या येषे
ष्टं न दमक्तमे दास्याः । यस्य दृष्टं संशयनं कोशस्य च श्रीवत्सस्य च । शय्या ममाप्यशून्यास्तु तस्या जंन्मनिज
न्मनि जन्मनि शय्यायाः । अष्टविष्टपदा आसनोपानहौ छत्रं मुद्रिका चकमंडलुः । भाजनं भोजनाधारी वस्त्रा
णि अष्टविधं पदा । पददानं । गन्नतमुक्ते ॥ ----- नदानेन मुद्रिका भोजनेन वा । आज्यस्य यज्ञोपवीते

दानम०
॥२६२॥

नपदं संपूर्णतां व्रजेत् ॥ चतुर्दशोपदानानि उक्तानि तत्रैव --- रोदकं चैवोपानहौ च कमंडलुः ॥ छत्रं वस्त्रं
तथा यष्टिर्लोहदंडस्तथाष्टमः ॥ अग्निष्टिकां च दीपं च दीपं च तिलान् तांबूलमेव च ॥ चंदनं पुष्पदानं चोप
दानानि चतुर्दशेति ॥ देवदेव जगन्नाथ विश्वात्मन् दत्तया नया ॥ प्रनोत्रिविकया देव प्रीतो भव जनार्दन ॥ त्रि
विकायाः ॥ रथ्याप्रपनापायनमस्ते विक्रमेण ॥ विश्वभृता यनाथाय च्यूरणायनमोनमः ॥ रथस्य ॥ कंटको
छिष्टपाषाणवृश्चिकादिनिवारणे ॥ पादुके संप्रदास्यामि विप्रस्य मि विप्र प्रीत्या प्रगृह्यतां ॥ पादुकयोः ॥ उपानहौ
प्रदास्यामि कंटकादिनिवारणे ॥ सर्वस्थानेषु सुखदा मतः शांतिं प्रयच्छ मे ॥ उपानहोः ॥ इहामुत्रातपत्राणं कुरु के
शव मे प्रभो ॥ छत्रस्य ॥ कमंडलुजलैः पूर्णः स्वर्णाग्निर्मल [illegible] ॥ अर्पितस्ते महासेन प्रसन्नस्ते नमे भव ॥ कमंडलोः
॥ शशांककरसंकाशं हिमडिंडीरपांडुरं ॥ प्रोत्सारयामि दुष्कृतं चामरस्य वदत्रमा ॥ चामरस्य ॥ पत्रिका सर्वजं
तूनां सौत्यानंदकरी शुभा ॥ पिष्टणां दानिस्तं मतः शांतिं प्रयच्छ मे ॥ व्यजनस्य ॥ दर्शनित्वमादर्पन्दणां
मंगलदायकः ॥ शौर्यसौभाग्यसत्कांतिनिर्मलदानदो भव ॥ दर्पणस्य ॥ नग वन्नस्य सहस्ते त्रादृढाधरविन

रामः
॥७३४

शानः ॥ तवायुधप्रदानेन शूलं नस्यतु मे सदा ॥ शूलस्य ॥ सर्वयहं ततारेशासवैं शस्त्रं रणां रक्षसामायुधा हि
भास्कर संक्रांतिः शूलदोषं मो निवारय दिवाकर ॥ संक्रांतिशूलस्य ॥ त्वं देवानां मनुष्याणां रक्षसामायु
धावसि ॥ तस्मात्सर्वप्रयत्नेन शांतिर्भवतु सर्वदा ॥ आयुधस्य ॥ सोमो रुवानिदारुवानिदारु निजातवेदसि
यानि च ॥ तस्मादेषां प्रदानेन निम्नियं धेहि विभावो ॥ काशानां शरणं सर्वलोकानां लज्जायारक्षणं परं ॥ सुवेशधारि
तं यस्माद्वासः शांतिं प्रयच्छ मे ॥ वस्त्रस्य ॥ रक्तवस्त्रयुगं यस्माद्दारिद्र्यस्य प्रियं स्त्रः ॥ प्रदानादस्य मे सूर्य ॥ अतः शांतिं
प्रच्छ मे ॥ रक्तवस्त्रयुग्मस्य ॥ धर्मराजेन विहितं कृष्णवस्त्रं सुरोत्तमं ॥ सर्वक्लेशविनाशाय कृष्णवस्त्रं ददाम्यहं
कृष्णवस्त्रस्य ॥ ऊर्णपट्टमनुध्येयं स्वर्णबीजं तवप्रियं [illegible] गदे वेशपापं संहरस्व वरं ॥ मेषसमुत्पन्ना
शीतव्यातन्नया पट्टा यस्मात्तुषारहारी स्यादतः शांतिं प्रयच्छ मे ॥ ऊर्णायाः ॥ ब्रह्मसूत्रं महादिव्यं मयाप
ते न निर्मितं ॥ ब्राह्मणजन्मास्कमेदेव ब्रह्मसूत्रप्रदानतः ॥ उपवीतस्य ॥ अष्टाविंशतिसंख्याकैः रुद्राक्षैर्योजिताम
या अर्पिता तव हस्ते वरदा गृहाण सुरसत्तम ॥ अक्षमालायाः ॥ सर्वपापक्षयं ज्ञानकारणं ललिताक्षरं ॥ पुस्तकं मे

प्रयच्छामि प्रिया भवति भारति ॥ पुस्तकस्य ॥ कर्पूरकदली भूते देवदेवप्रियसदा ॥ नागपोत्तमोत्र पाणं भवत द्वा
नात्सुखमश्नुते ॥ कर्पूरस्य ॥ जटाभ्नोस्फकवांदेवी व्रेणनाभिसमुद्भवं ॥ मनाद्दत्तं संप्रदास्यामि मम संतु मनो
रथाः ॥ गंधद्रव्यस्य ॥ नंदनावासमंदारसरवे हृद्दारकान्विते ॥ चंदनत्वत्प्रदानात्मे सोज्ञानदग्धो भव ॥ चंदन
स्य ॥ श्रीखंडागरुकर्पूरकस्तूरीकुंकुमान्वितः ॥ विलेपनं प्रयच्छामि सौख्यमस्तु सदा मम ॥ चंदनाद्यनुलेप
नस्य ॥ नमस्ते भोपिदक्तस्य संस्कभैतासिसुरासुरैः ॥ विन्यसांगेषु कस्तूरी सुखदा मम ॥ कस्तूर्याः ॥ कंदर्प
दर्पदं यस्मात्कर्पूरं घ्राणतर्पणं ॥ अहं पंति भव त्तापस्त दानादपसर्पतु ॥ यद ॥ नूदर्पसंलग्नं कुंकुमादिवि
लेपनं ॥ जलक्रीडासु गोपीनां द्वारवत्या जनार्पितं ॥ गोपीचंदनमित्येतं मुनीन्कल्मषापहं ॥ तस्मादस्य प्रदा
नेन विष्णुर्दिशतु वांछितं ॥ गोपीचंदनस्य ॥ मणिकांचनपुष्पाणि मणिमुक्तामयानि च ॥ तुलसीपत्रदानस्य क
लांनार्हति षोडशीं ॥ तुलसीपत्रदाना द्वाब्रस्तरणः ॥ कापसंभवं ॥ पापं पश्यामममायातु सर्वे संतु मनोरथा ॥ तुल
स्याः ॥ क्रादयंतिमनोयस्मात स्मात्सुमनसः स्मृता ॥ दत्ताद्दत्तु मे नित्यमत्माह्लादमतीन्द्रियं ॥ पुष्पस्य ॥ इदं फ


लं मया विप्र न्यस्तं पुरतस्तव ॥ तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ॥ फलस्य ॥ ब्रह्महत्यादिपापघ्नं ब्रह्म
णा निर्मितं पुरा ॥ कुष्मांडं बहुबीजाढ्यमतः शांति प्रयच्छ मे ॥ कूष्मांडस्य ॥ तांबूलं श्रीकरं भद्रं ब्रह्माविष्णु
शिवात्मकं ॥ अस्य प्रदानाद्धूम्राया शिवं ददत्तु सुष्कलं ॥ तांबूलस्य ॥ पूरितं फगनागवल्लीदलान्वितं ॥ क
र्लेनि कर्णपत्रेण कर्पूरपिटकेन च ॥ सफगरवं उनिं दिव्यं गंधवार्धरसं प्रियं ॥ करकं त्वं निराकांतं त्वत्प्र
सादात्कुरुष्व मे ॥ तांबूलकरंडस्य ॥ लक्ष्मीप्रियाच लक्ष्मीच लक्ष्मीच वसनप्रिया सौभाग्यफलवनस्त्रीणां ॥
हरिद्रा भाग्यदा स्तु मे ॥ हरिद्रायाः ॥ जरा नो जायते यस्मिन्नंडनं शुभकर्मसु ॥ तस्माज्जीरकदानेन प्रीयतां गिरिजा
मम ॥ जीरकस्य ॥ कंचुकी वस्त्रयुग्मे च तथा कर्णावतंसके ॥ कंठसूत्रे च भूषाभिः प्रीयतां निमितं दिनी ॥ सौभा
ग्यद्रव्यसंयुक्तशूर्पस्य ॥ रामपत्नी महाभागे फलप्रपूर्तिनिरामये ॥ गृहाण मा नि शूर्पाणि मा नि शूर्पाणि म—
या दत्तानि जानकी ॥ शूर्पस्य ॥ नवग्रहदक्षिणादानमंत्राः ॥ मास्ये ॥ कपिलेस वृक्षैः तानां पूजनीया सिरोहिणि
सर्वतीर्थमयी यस्मादतः शांतिं प्रयच्छ मे ॥ इति ॥ इति श्री जगद्गुरु भट्टनारायणसूरिसूनु पंडित श्री रोरल्ल

मीमांसकशंकरमहात्मजनहरनीचकं वहुते भास्कारे दानमयूरवः संपूर्णम्॥ श्री सांबादित्योजयति॥
लेखकपाठकयोः शुभं भवतु कल्याणमस्तु श्रीराम॥ ॥ छ॥ ॥ श्री॥ छ॥